श्रीपरमात्मनेनमः

सोमप्रभाचार्य कृतसूक्तिमुक्तावली शतकप्रकरणसटीक

मूलसूत्र काव्य १००

ते उपर श्रीचंद्रकीर्त्ति स्रीनाशिष्यहर्षकीर्तिसूरीकृता टीका सटीकग्रंथ

वेद्याशालाने हितने माटे

शास्त्री व्रजवल्लभे शोधीने

अमदावाद मध्ये

ओरीअेंटलप्रेश कंपनी लीमीटेडमां पीरमसानारोड आगल

मुद्रालयनेंविषे मुद्रांकित कराव्योछे

संवत् १९२३ तारीख ९ मी सपटेंबर सन १८६६

॥ ॥श्रीमत्पार्श्वजिनंनत्वा ॥ स्तोवसीयसकारकं ॥ सद्यःसंस्मृतिमात्रेण ॥ प्रत्यूह व्यूहवारकं ॥ १ ॥ श्रीचंद्रकीर्त्तिसूरीणां ॥ सद्गुरूणांप्रसादतः ॥ सिंदूरप्रकरव्याख्या ॥ क्रियतेहर्षकीर्त्तिना ॥ २ ॥ युग्मं ॥ ग्रंथकर्त्ता आदौ इष्टदेवताचरणस्मरण रूपं मंगलाचरणपूर्वकं श्रोतॄन्प्रतिआशीर्वादवृत्तमाह व्याख्या ॥ पार्श्वप्रभोः श्रीपा

अथ सिंदूर प्रकर प्रारंभः ॥ श्रीपरमात्मने नमः ॥

र्श्वनाथस्य क्रमयो श्चरणयो र्नखद्युतिभरः नखकांतिसमूहो वो युष्मान् पातु अवतु रक्षतु ॥ कथंभूतो नखद्युतिभरः तपः करिशिरः क्रोडे सिंदूरप्रकरः तपएव करी हस्ती तस्य शिरः क्रोडो मस्तकमध्यभागं ॥ [illegible]लं तत्र सिंदूरप्रकरः सिंदूर पुंजसदृशः नखद्युतिभरस्य रक्तत्वात् ॥ सि[illegible]नः कथंभूतोः ॥ नख०

कषायाटवीदावार्चिर्निचयः कषायाः क्रोध[illegible] ॥ स्तएव अटवी अरण्यं वनं तस्याः दावार्चिर्निचयः दावाग्निज्वालासमूह[illegible] पुनः कथंभूतः नख० प्रबोध दिवसप्रारंभसूर्योदयः प्रबोधो ज्ञानं स एवदिवसो दिनं तस्य प्रारंभे उदये सूर्योदय समानः पुनः कथंभूतः नख० ॥ मुक्तिस्त्रीकुचकुंभकुंकमरसः मुक्तिरेवस्त्री तस्याः कु

॥एदं० ॥ सिंदूरप्रकरस्तपः करिशिरः क्रोडे कषायाटवी ॥
दावार्चिर्निचयः प्रबोधदिवस प्रारंभसूर्योदयः ॥

चावेव कुंभौ तत्र कुंकुमरसःकाश्मीरजद्रवलेपतुल्यः मुक्तिस्त्रीवदनैककुंकुमरसइति वा पाठः पुनः कथंभूतः नख० श्रेयस्तरोः पल्लवप्रोल्लासः श्रेयः कल्याणमेव तरु वृक्ष स्तस्य पल्लवानां नूतनपत्राणां प्रोल्लासः उद्गमः ईदृशः पार्श्वप्रभोः क्रमयो श्चरणयो नखदुतिभरो वो युष्मान् पातु रक्षतु नखद्युतिभरस्य रक्तवर्णत्वात् रक्ता एवोपमा १

भाभव्यप्राणान् ॥ एवंज्ञात्वा मनसि विवेक मानीय श्रीपार्श्वनाथस्य चरण[illegible] लौ एवसेव्यौ सेव्यमानानां यत्पुण्यमुत्पद्यते तत्पुण्यप्रसादात् उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥ १ ॥ अथकविः सज्जनः पुरुषान् प्रति स्वविज्ञप्तिमाह ॥ वाख्या ॥ संतः सज्जनाः मम प्रसन्नमनसः संतु ममोपरि प्रसन्नचित्ता भवंतु ॥ किंविशिष्टाः

मुक्तिस्त्रीवदनैककुंकुमरसः श्रेयस्तरोः पल्लव ॥
प्रोल्लासः क्रमयो र्नखद्युतिभरः पार्श्वप्रभोः पातु वः ॥ १ ॥

संतः वाचां कविवाणीनां विचारे सदसत् विचारणे उद्यता[illegible]ना: इयं क विवाणी समीचीना ॥ इयं असमीचीना ॥ इतिविचारज्ञाः यत् यस्मि[illegible]कारणात् अंभः पानीयं कमलानि सूते उत्पादयति ॥ परं तत्परिमलं तेषां कमलानां परि मलं आमोदं वाता वायवो वितन्वंति ॥ विस्तारयंति ॥ तथा ऽहं एनं ॥ ग्रंथं र

चयिष्यामि ॥ परं ग्रंथस्य विस्तारं सज्जनाः करिष्यंति यतः पश्चानिबोधयत्यर्थी ॥ काव्यानिकुरुतेकविः ॥ तत्सौरभंनभस्वंतः संतस्तन्वंतितद्गुणान् ॥ १ ॥ वा अथवा ममाभ्यर्थनया सतामग्रे प्रार्थनया किं ॥ अपितु न किमपि कृतः ॥ चेत् ॥ आसां ममवाणीनांमध्ये गुणोस्ति तत स्तदा ते संतः स्वयमेव प्रथनं विस्तारं क

संतः संतु मम प्रसन्नमनसो वाचां विचारोद्यताः ॥

सूते ऽभः कमलानि तत्परिमलं वाता वितन्वंति यत् ॥

र्त्तारः करिष्यंति ॥ यद्यस्मिन् शास्त्रे कश्चित् गुणो भविष्यति ॥ तदा संतः स्वयमेव ममार्थनां विनैव विस्तारं करिष्यंति ॥ अथचेत् यदि आसां ममवाणीनां मध्ये गुणो नास्ति ॥ तदा तेन प्रथनेन विस्तरणेन किं ॥ अपितु न किमपि ॥ कथंभुतेन तेन प्रथनेन विस्तारणेन यशः प्रत्यर्थिना ॥ यशसः प्रत्यर्थि शत्रुभूतं यत्त

२

त् यशः प्रत्यर्थि तेन यशः प्रत्यर्थिना यशसो विनाशकेन ॥ निर्गुणस्य विस्तारणेन अयशएव भवतीत्यर्थः ॥ २ ॥

अथ विहितसकलसुरासुरसेव्यस्य देवाधिदेवस्य श्रीवीतरागस्यागमानुसारेण भव्यानां हितहेतवे धर्म्मोपदेशमाह ॥ त्रिवर्गे • भोभव्याः त्रिवर्गसंसाधनं अंतरेण नरस्य आयु

किं वा भ्यर्थनया मया यदि गुणोस्त्या सां तत स्ते स्वयं ॥

कर्त्तारः प्रथनं न चेदथ यशः प्रत्यर्थिना तेनकिं ॥ २ ॥

: पशोरिव विफलं ज्ञेयं ॥ धर्मार्थकाममोक्षा श्चत्वारः पुरुषार्था श्चतुरवर्गा स्तेषां मध्ये सांप्रतं ॥ अस्मिन् भरतक्षेत्रे मोक्षः साधयितुं न शक्यः ॥ अतः कारणात् शेषस्त्रिवर्गः ॥ धर्मार्थकामरुपः ॥ तस्य त्रिवर्गस्य संसाधनं उपार्जनं अंतरेण विना नरस्य मनुष्यस्य ॥ आयु र्जीवितं पशोरिव विफलं निःफलं वृथेत्यर्थः ॥

॥ येन नरेण धर्मार्थकामानां साधनं उपार्ज्जनं न क्रियते ॥ तस्य जीवितं पशोरिव छागादेरिव वृथा निःफलं ॥ यतः धर्मार्थकाममोक्षाणां ॥ यस्यैकोपिनविद्यते ॥ अजागलस्तनस्येव निःफलंतस्यजीवितं ॥ १ ॥ इति ते त्रयोपि किंसदृशाः वा किंचिदंतरं इत्याह ॥ तत्रापि त्रिवर्गे धर्म्मं प्रवरं वदंति ॥ श्रेष्टं कथयंति ॥ कुतः यत् य

त्रिवर्गसंसाधनमंतरेण ॥ पशो रिवायु र्विफलं नरस्य ॥
तत्रापिधर्म्मं प्रवरं वदंति ॥ न तं विना यद्भ वतो र्थकामौ ॥ ३ ॥

स्मात्कारणात् धर्म्मंविना अर्थकामौ न भवतः येन पूर्वजन्मनि धर्म्मः कृतोभवति तस्यैवात्रार्थकामौ भवतः ॥ नान्यस्य ॥ यदुक्तं ॥ किंजंपिएणबहुणा जंजंदीसईसमच्छ जीयलोए इंदीयमणाभिरामं ॥ तंतंधम्मफलंसव्वं ॥ १ ॥ अतः कारणात् त्रिवर्गे धर्म्मएव श्रेष्ठः ॥ भोभव्यप्राणि नेवंज्ञात्वा मनसि विवेकमानीय ॥ श्रीसर्व्वज्ञप्रणीतो ३

धर्म्मएवाचरणीयः धर्माचरतासता यत्पुण्यमुत्पद्यते ॥ तत्पुण्यप्रसादात् ॥ उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥ ३ ॥ अथ नरभवस्य दुर्लभत्वमाह यः प्राप्य ० यो मूढो मूर्षः इदं दुःप्रापं नरत्वं प्राप्य ॥ यत्नेन उद्यमेन धर्म्मं नकरोति ॥ सः क्लेशप्रबंधेन लब्धांचिंतामणिरत्नं प्रमादात् अब्धौ समुद्रे पातयति ॥ यो मूर्षः पुमान् दुःखेन महताकष्टेन

यः प्राप्य दुःप्राप मिदं नरत्वं ॥ धर्म्मं न यत्नने करोति मूढः ॥
क्लेशप्रबंधेन स लब्ध मब्धौ ॥ चिंतामणिं पातयति प्रमादात् ॥

प्राप्यं यतः चुल्लग १ पासग २ धन्ने ३ ॥ जुए ४ रयणेय ५ सुभिण ६ चक्केय ७ चर्म्म ८ युग ९ परमाणुं १० ॥ दसदिठंतामणुअजम्मे ॥ १ ॥ इत्यादिदशभि र्दृष्टांते दुर्लभं इदं नरत्वं मनुष्यजन्म प्राप्य लब्ध्वा ॥ यत्नेन सावधानतया श्रीवीतरागप्रणीतं धर्म्मं न करोति उत्प्रेक्षते स क्लेशप्रबंधेन महताकष्टप्रकारेणा तिप्रयासेन लब्धं प्रत्यक्षं

प्राप्तं चिंतामणिरत्नं प्रमादात् अब्धौ समुद्रे पातयति ॥ अत्र ब्राह्मणरत्नद्वीप देव्यदत्त चिंतामणिरत्नसमुद्रपातनसंबंधो वाच्य : भोभव्यप्राणीन् एवं ज्ञात्वा मनसि विवेक मानीय यत्नेन धर्म्मएव कार्य : धर्म्मं च कुर्वतां सतां यत् पुण्यमुत्पद्यते ॥ तत्पुण्यप्रसादात् उत्तरोत्तर मांगलिक्यमाला विस्तरंतु ॥ ४ ॥ अथ मनुष्यभवस्य सर्वोत्कृष्टमाह

स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते ॥
पियूषेण प्रवरकरिणं वाहयत्यैधभारं ॥

॥स्वर्ण स्थाले॰ य: पुमान् प्रमत्त : सन् प्रमादस्य वशं पतित: सन् मद्य विषय कषायनिद्रा विकथा रूपप्रमादवशंगत : सन् दु : प्राप्यं चतुरशीतिलक्षजिवयोनिषु भ्रमती जीवेन दुखेन महताकष्ठेन प्राप्यं यत् मर्त्यजन्म मनुष्यभवं तत् मुधा वृथा : श्रीजिन धर्म्मं विना नि :फलं गमयति स पुमान् स्वर्णस्थाले रजो धुलि कच वरादि क्षिप

ति स्वर्णस्थालतुल्यं मर्त्यजन्मरजःसदृशः प्रमादा : पुन : स: पुमान् पीयूषेण अमृतेन कृत्वा ॥ पादशौचं चरणप्रक्षालनं विधत्ते करोति ॥ पीयूषस्य बिंदुमात्रपानेना जरामरत्वं स्यात् ॥ तत्पादप्रक्षालनार्थं मुधावृथा गमयतीत्ययुक्तं ॥ पुन:स: पुमान् प्रवरकरिणं प्रधानहस्तिनं ऐंधभारं इंधनकाष्ट समूहं वाहयति ॥ यस्मिन् गजे द्वारे

चिंतारत्नं विकिरति कराद्वा यसो ड्डायनार्थं ॥
यो दुःप्राप्यं गमयति मुधा मर्त्यजन्म प्रमत्त: ॥ ५ ॥

बद्धे अपि सति शोभा भवति ॥ तेन इंधनानयन मयुक्तं ॥ पुनः स: पुमान् वायसोड्डायनार्थं काकस्य उड्डायननिमित्तं चिंतामणिरत्नं ॥ करात् हस्तात् विकिरति विक्षिपति ॥ यथा मनोवांछितार्थदायकस्य चिंतामणिरत्नस्य काकउड्डायनार्थं विक्षेपण मयुक्तं तथा धर्मसाधकेन मर्त्य जन्मना प्रमादसेवन म युक्तं ॥ भोभव्यप्राणी

न् एवं ज्ञात्वा मनसी विवेक मानीय प्रमादं त्यक्त्वा धर्मेण कृत्वा मनुष्य जन्म सफलं कार्यं ॥ धर्मांचरतां सतां यत् पुण्यमुत्पद्यते ॥ तत् पुण्य प्रसादात् उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥ ९ ये तु असाराणां विषयाणां कृते धर्मं त्यजंति ते मूढा एवेत्याह ॥ तेधत्तूर० ये अधमा मूर्खाः पुरुषाः लब्धं प्राप्तं धर्म्मं परिहृ

ते धत्तूरतरुं वपंति भुवने प्रोन्मूल्य कल्पद्रुमं ॥
चिंतारत्न मपास्य काचशकलं स्वीकुर्वते तेज जडाः ॥

त्य त्य क्त भोगाशया विषयवांछया धावंति ॥ विषयार्थं प्रवर्त्तंते ॥ ते नरा भवने स्वगृहे प्रोद्गतं उत्पन्नं कल्पवृक्षं प्रोन्मूल्य उत्पाट्य धत्तूरवृक्षं वपंति आरोपयंति पुनः स्ते जडाः मूर्खा. चिंतामणि रत्नं अपास्य त्यक्त्वा दूरीकृत्य काच शकलं काचखंडं स्विकुर्वते गृह्णंति ॥ पुन स्ते जडा गिरींद्रसदृशं ॥ पर्वतमायकायं उच्चं द्विरदं हस्तिनं

विक्रीय रासभं गर्दभं क्रीणानि ॥ मूल्येन गृह्णंति ॥ अत्र कल्पवृक्षसदृशोधर्म्मः ॥ धत्तूरसदृशा भोगाः एवं सर्वत्रोपनयः ॥ भोभव्यप्राणीन् ॥ एवं ज्ञात्वा मनसि विवेक मानीय ॥कल्पवृक्षचिंतामणिसदृशः ॥श्रीजिनधर्म्मएवाराध्यः आराधयतां यत्पुण्यमुत्पद्यते तत्पुण्यप्रसादात् उत्तरोत्तरमांगलिक्यमालाविस्तरंतु ॥ ६ ॥ अथ नरभवस्य ध

विक्रीय द्विरदं गिरींद्रसदृशं क्रीणंति ते रासभं ॥
ये लब्धं परिहृत्य धर्म्मं मधमा धावंति भोगाशया ॥६॥

र्मसामग्र्या श्च दुर्लभत्वमाह ॥अपारेसंसारे० यः पुमान् विषयसुखतृष्मातरलितः सन् विषयाणां कामभोगानां शब्दरूपरसस्पर्शगंधानां सुखस्य तृष्मा वांछा तया तरलितो वाहितो व्याकुली कृतः सन् ॥ अपारे अनंते संसारे कथमपि महताकष्टेन नृभवं मनुष्यजन्म समासाद्य प्राप्य धर्म्मं न कुर्यात् न करोति सः पुमान् पारा

वारे समुद्रे ब्रुडन् निमज्जन् ॥ प्रवरं उत्तमं ॥ प्रवहणं पोतं अपहाय त्यक्त्वा तरणार्थं उपलं पाषाणं उपलब्धुं ग्रहीतुं प्रयतते यत्नं करोति ॥ उद्यमं करोति ॥ कथंभूतः सः मूर्खाणां मुख्यः ॥ मूर्खेषु वृद्धमूर्खः अत्रसंसारसमुद्रः धर्म्मः प्रवहणं ॥ विषयाः पाषाणसदृशा इत्युपनयः ॥ भोभव्यप्राणीन् ॥ एवंज्ञात्वा ॥ मनसि विवेक

अपारे संसारे कथ मपि समासाद्य नृभवं ॥

न धर्मं यः कुर्या द्विषयसुखतृष्नातरालितः

मानीय ॥ संसारसमुद्रतारकःश्रीधर्म्म एव आराध्यः आराधयतां च सतां यत्पुण्य मुत्पद्यते ॥ तत्पुण्यप्रसादात् ॥ उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥ ७ ॥ अथ अस्मिन् शास्त्रे एता न्युपदेशद्वाराणि कथयिष्यंते ॥ इत्युपदेशद्वारेण द्वार वृत्तमाह ॥ भक्तिमिति ॥ भोभव्यप्राणीन् यदि तव निवर्त्तिपदे मोक्षे गंतुं मनो ऽस्ति ॥ तदा

त्वं तीर्थं करे ॥ श्रीवीतरागे भक्तिं भावपूजां गुणोत्कीर्त्तनरूपां कुरुष्व ॥ १ ॥ पुन गुरौ धर्म्मोपदेशके भक्तिं कुरुष्व ॥२॥ पुन जिनमते जिनशासने भक्तिं कुरुष्व ॥३ पुनः चतुर्विधसंघे भक्तिं कुरुष्व ॥४॥ हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहा द्युपरमं कुरुष्व ॥ ९ ॥ हिंसा जीववधःप्राणातिपातः ॥ १ ॥ अनृतं असत्यं मृषावादः ॥ २ ॥

ब्रुडन् पारावारे प्रवर मपहाय प्रवहणं ॥

स मुख्यो मूर्खाणा मुपल मुपलब्धुं प्रयतते ॥७॥

स्तेयं चौर्य्यं अदत्तादानं अदत्तपरस्ववस्तुग्रहणं ॥ ३ ॥ अब्रह्म मैथुनं स्त्रीसेवा ॥ ४ परिग्रहो धनधान्यादि नवविधः ॥ एभ्य उपरमं निवर्त्तनं कुरुष्व ॥ ९ ॥ पुनः क्रोधादीणां क्रोध ॥ १० ॥ मान ॥ ११ ॥ माया ॥ १२ ॥ लोभ ॥ १३ ॥ रूपारीणां जयं कुरुष्व ॥ पुनः सौजन्यं सुजनभावं ॥ सर्वं जीवेषु मैत्रीभावं कुरुष्व ॥

१४ ॥ पुनः गुणीसंगं गुणीनां गुणवतां मनुष्याणां संगं संगतिं कुरुष्व ॥ १५ ॥ पुनः इंद्रियदमनं ॥ पंचेंद्रियाणां दमनं कुरुष्व ॥ १६ ॥ पुन दानं सुपात्रादि पंच प्रकारं कुरुष्व ॥ १७ ॥ पुन स्तपोऽनशनंमूनोदर्यादि बाह्यं आभ्यंतरं चद्वादशविधं कुरुष्व ॥ १८ ॥ पुन भावनां शुभचित्तभावं कुरुष्व ॥ १९ ॥ पुन वैराग्यं सं

भक्तिं तीर्थंकरे गुरौ जिनमते संघे च हिंसानृत ॥

स्तेया ब्रह्म परिग्रहा द्युपरमं क्रोधा द्यरिणां जयम् ॥

सारात् भोगादिभ्य श्च विरक्तभावं कुरुष्व २० एतानि मोक्षपददायकानि ज्ञात्वा सम्यक् प्रकारेणा राधनीयानि ॥ आराधयतां सतां यद् त्पद्यते पुण्यं ॥ तत्पुण्यप्रसादात् उत्तरोत्तर मांगलिक्यमाला विस्तरंतु ॥ ८ ॥ अथ यथोद्देश स्तथैव निर्देश इतिवचनात् अनुक्रमेण द्वाराणि विवृणोति तत्र प्रथमं चतुर्भि र्वृत्तैः श्रीतीर्थंकर

॥ ॥श्रीमत्पार्श्वजिनंनत्वा ॥ स्तोवसीयसकारकं ॥ सद्यःसंस्मृतिमात्रेण ॥ प्रत्यूहव्यूहवारकं ॥ १ ॥ श्रीचंद्रकीर्त्तिसूरीणां ॥ सद्गुरूणांप्रसादतः ॥ सिंदूरप्रकरव्याख्या ॥ क्रियतेहर्षकीर्तिना ॥ २ ॥ युग्मं ॥ ग्रंथकर्त्ता आदौ इष्टदेवताचरणस्मरणरूपं मंगलाचरणपूर्वकं श्रोतृन्प्रतिआशीर्वादवृत्तमाह व्याख्या ॥ पार्श्वप्रभोः श्रीपा

अथ सिंदूर प्रक्रम प्रारंभः ॥ श्रीपरमात्मने नमः ॥

र्श्वनाथस्य क्रमयो श्चरणयो र्नखद्युतिभरः नखकांतिसमूहो वो युष्मान् पातु अवतु रक्षतु ॥ कथंभूतो नखद्युतिभरः तपः करिशिरः क्रोडे सिंदूरप्रकरः तपएव करी हस्ती तस्य शिरः क्रोडो मस्तकमध्यभागं ॥ [illegible] तत्र सिंदूरप्रकरः सिंदूरपुंजसदृशः नखद्युतिभरस्य रक्तत्वात् ॥ [illegible] पुनः कथंभूतोः ॥ नख०

सम्यक्निर्मल विधायिनी इह लोके परलोके च सर्व सौख्यदायिनी वंदनादि गुणस्तुति श्रीजीनभावपूजा कार्या कर्वतां सतां यत्पुण्य मुत्पद्यते तत् पुण्य प्रसादात् उत्तरोत्तरमांगलीक्यमाला विस्तरंतु ९ पुनः श्रीजिनस्य भावपुजायाः फलमाह स्वर्गस्तस्य • यो जनः श्रद्धाभरभाजनं सन् श्रद्धा रुचेः तस्या भारः

पापं लुंपति दुर्गतिं दलयति व्यापादय त्यापदं ॥
पुण्यं संचिनुते श्रियं वितनु ते पुष्माति नीरोगतां ॥

प्रचूरता तस्य भाजनं स्थानं भाजनं शब्द स्यां नहिलिंगत्वा नपुंसकत्वं शुभभावना युक्तः सन् जिनपतेः श्रीवीतरागस्य भाव पूजां विधत्ते करोति तस्य जनस्य स्वर्गो देवलोको गृहांगणगृहस्यां गणव निकटो भवति पुनः शुभा मनोहरा साम्राज्य लक्ष्मीः राज्यरादि स्तस्य सहचरि सार्थ वर्त्तिनी भवति पुन वपुर्वेश्मनि वपुरेव

शरीरमेव वेश्म गृहं तस्मिन् सौभाग्य धैर्यौदार्यचातुर्यादिगुणानां आवलिः श्रेणि स्थिरं स्वेच्छया विलसति आगत्य विलासं करोति तिष्ठती पुनः पुनः संसारः सुतरः सुखेन तीर्यते इतिसुतरः सुखेन तरीतुं शक्यो भवति पुनः शिवं मोक्षं अजसा शीघ्रं तस्य करतलक्रोडे ॥ हस्ततलमध्ये लुठति हस्तगोचरो भवती त्यर्थः ॥ अतो

सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः ॥
स्वर्गं यछति निर्वृतिं चरचयत्य र्चा र्हतां निर्मिता ॥ ९ ॥

भावार्हतः उत्पन्नकेवलज्ञाना श्चतुस्त्रिंशदतिशये विराजमानाः समवसरणस्थाः इति यतः ॥ उसरणमवसिरित्ता ॥ चउतीसंअईसएनिसेवित्ता धम्मकहंचकहंता ॥ अरिहंताहुंतुमेसरणं ॥१॥ इति वचनात् ॥ भोभव्यप्राणिन् एवं ज्ञात्वा ॥मनसि विवेक मानीय ॥ अर्हतां भावपूजां कार्या ॥ कुर्वतां च यत्पुण्य मुत्पद्यते ॥ तत्पुण्यप्रसादात् उत्त

रोत्तरमांगलिक्यमाला भवंतु ॥१०॥ पुन र्भावपूजायाः फल माह जिनार्चा श्रीवी
तरागस्य वंदनादिभावपूजां रचयतः कुर्व्वतः पुरुषस्य आतंको भयं कदाचित् अ
भिमुखं सन्मुखं न पश्यति न विलोकयति ॥ क इव कुपित इव यथा कश्चित् कुपितो
रुष्टो भवति स यथा तस्य सन्मुखं न पश्यति तथे त्यर्थः ॥ पुन र्दारिद्र्यं दारिद्रत्वं

स्वर्ग स्तस्य गृहांगणं सहचरी साम्राज्यलक्ष्मीः शुभा ॥
सौभाग्यादिगुणावलि र्विलसति स्वैरं वपु र्वेश्मनि ॥

अनुदिनं निरंतरं तस्य दूरे नश्यति दूरेयाति किमिव ॥ चकितमिव भयभीत
इव ॥ पुन र्नरकादिकुगति स्तस्य संगं समीपं त्यजति ॥ मुंचति का इव ॥ विर
क्ता कुपिता रुष्टा कांता इव ॥ स्त्री इव ॥ यथा विरक्ता स्त्री भर्त्तुः संगं त्यजति
तथेत्यर्थः पुनः उदय अभ्युदयः प्रतापैश्वर्यादिवृद्धि स्तस्य अभ्यर्णं समीपं न मुंचति

न त्यजति क इव सुहृ दिव मित्र मिव ॥ अतो र्हतां भावपूजा वंदनादि र्कार्या
॥भोभव्यप्राणिन् एवं ज्ञात्वा मनसि विवेक मानीय ॥ श्रीजिनस्य भावपुजा कर्त्त
व्या कुर्व्वतां च सतां यत्पुण्य मुत्पद्यते ॥ तत्पुण्यप्रसादात् उत्तरोत्तरमांगलिक्यमा
ला विस्तुरंतु ॥११॥ पुनः श्रीजिनभावपूजायाः माहात्म्य माह ॥ यः पुरुषः पुष्पै

संसारः सुतरः शिवं करतलक्रोडे लुठत्यं जसा ॥
यःश्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ १० ॥

कृत्वा जिनं श्रीवितरागं अर्चति पुजयति स पुरुषः स्मितसुरस्त्रीलोचनैः अर्च्यते
पुज्यते ॥ स्मितानि विकसितानि यानि सुरस्त्रीणां देवांगनानां लोचनानि नेत्रा
णि तैः ॥ देवलोके देवत्वेनो त्पन्नः ॥ स देवांगनाभि र्विकसितनेत्रैः अर्च्यते पुज्य
ते सरागं अवलोक्यते इत्यर्थः ॥ पुन र्यः पुमान् एकशः एकवारं श्रीजिनं वंद

ते स अहर्निशं दिवारात्रौ त्रिजगता त्रिभुवनेन वंद्यते यो जिनं वंदते स त्रिजगद्वंद्यो भवती त्यर्थः ॥ पुन र्यः पुमान् तं श्रीजिनं स्तौति वर्णयति स पुमान् परत्र परलोके वृत्रदमनस्तोमेन वृत्रदमनानां इंद्राणां स्तोमेन समूहेन स्तूयते ॥ गुणस्तुत्या कत्वा वर्णयते ॥ पुन र्य स्तं श्रीजिनं ध्यायति पिंडस्थ पदस्थ रूपस्थ रूपातीतभेदै

कदाचिन्नातंकः कुपित इव पश्य त्यभिमुखं ॥

विदूरे दारिद्र्यं चकित मिव नश्यत्य नुदिनं ॥

हृदये ध्यानगोचरं करोति ॥ स पुमान् योगिभि र्योगीश्वरै र्महामुनिभि र्ध्यायते ॥ ध्यानगोचरःक्रियते ॥ कथंभूतः सः कृप्तकर्म्मनिधनः कृप्तं रचितं कृतं ॥ अष्टानां कर्म्मणां निधनं विनाशो येन स कृप्तकर्म्मनिधनः ॥ सिद्धावस्थां प्राप्त इत्यर्थः ॥ १२ १०
इति पूजाया प्रस्तावः ॥ सिंदूरप्रकराख्यस्य व्याख्यायां हर्षकीर्त्तिना सूरिणा विहि

तायां तु पूजायां प्रक्रमो जनि ॥१॥ अथ चतुर्भि र्वृत्तै र्गुरुभक्तिद्वार माह ॥ अवद्यमु० आत्महितवांछकेन पुरुषेण स एव गुरुः सेव्यः सः कः यः अवद्यमुक्ते पापवर्जिते सत्ये पथि धर्म्ममार्गे स्वयं प्रवर्त्तते प्रचलति च पुनः अन्यजनं अन्यलोकं शुद्धमार्गे प्रवर्त्तयति गुरु निस्पृहः ॥ परिग्रहादिवांछारहितः सन् ॥ पुन र्यः स्वयं संसार

विरक्ता कांते च त्यजति कुगतिः संग मुदयो ॥

न मुंचत्य भ्यर्णं सुहृदिव जिनार्चां रचयतः ॥ ११ ॥

समुद्रं तरन्सन् परं अन्यं तारयितुं क्षमः समर्थः ॥ गृणाति कथयति तत्व मिति गुरुः तत्वोपदेशकः शुद्धप्ररूपक इत्यर्थः ॥ यतः हीणस्सविसुद्धपरूवगस्स ॥ नाणाहियस्स कायव्वं ॥ जणचित्तग्गहणत्थं ॥ करंतिलिंगाविसेसंतु ॥१॥ अन्यच्च दंसणभठोनठो ॥ दंसणभठस्सनत्थिनिव्वाणं ॥ सिज्झंतिचरणरहिया दंसणरहियानासिज्झंति ॥२॥

अतः कारणात् यः शुद्धप्ररूपकः जिनाज्ञाराधकः स गुरुः सेव्यः नतु जमाल्यादयः कु गुरवः सेव्याः जे अहाछंदाः उत्सूत्रप्ररूपकाः स्वमतिकल्पितमतकर्त्तारः जिनाज्ञा विराधिकाः मायाविनस्ते तु कुगुरवः ॥ एवं भोभव्यप्राणिन् इति ज्ञात्वा मनसि विवेक मानीय शुद्धप्ररूपको जिनाज्ञाराधको गुरुः सेव्यः ॥ सेव्यमानानां यत् पुण्य

यः पुष्पै जिन मर्चति स्मितसुरस्त्रीलोचनैः सो र्च्यते ॥
यस्तं वंदत एकश स्त्रिजगता सो हर्निशं वंद्यते य स्तं

मुत्पद्यते तत् पुण्य प्रसादात् उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥१३॥ अथ पुन रपि गुरुसेवायाः फल माह विदलयति ० भोभव्याः तं गुरुं विनाऽन्यः कश्चित् भवजलनिधिपोतः प्रवहणं नास्ति ॥ भव एव संसार एव जलनिधिः समुद्र स्तत्र पो तः प्रवहणं ॥ संसारसमुद्रतारणे प्रवहणसमान गुरुं विना ऽन्यः कश्चिन्नास्ति ॥ यो ११

गुरुः कुबोधं कुत्सितज्ञानं मिथ्यात्वं विदलयति ॥ पुन र्यो गुरुः आगमार्थं सिद्धांता नां अर्थं बोधयति ज्ञापयति ॥ पुन र्यो गुरुः पुण्यपापे ॥ पुण्यं च पापं च पुन्यं पाते ते धर्म्माधर्म्मौ द्वे अपि व्यनक्ति प्रकटयति इदं पुण्यं इदं पापमिति कथंभूते पुण्यपापे सुगतिकुगति मार्गौ सुगतिश्च कुगतिश्च सुगतिकुगती तयो र्मार्गौ पुण्यं देवनरादि सुग

स्तौति परत्र धृत्रद्मनस्तोमेन स स्तुयते
य स्तं ध्यायति क्लृप्तकर्म्मनिधनः स ध्यायते योगिभिः १२

तिमार्गःपापं नरकतिर्यङ् ० रूपं कुगति मार्गः पुन र्यो गुरुः कृत्या कृत्यभेदं अवगमयति कर्त्तुं योग्यं कृत्य म योग्यं अ कृत्यं ॥ कृत्यं च अकृत्यं च कृत्याकृत्ये ॥ तयो र्भेदो वि वेको विचारस्तं ज्ञापयति ॥ यथा प्रदेशीनृपःमहाना स्तिकमतिः केशीगणधरगुरु णा प्रतिबोध्य तत्वमार्गे स्थापितः भोभव्यप्राणिन् इति ज्ञात्वा ॥ मनसि विवेक

मानीयं ॥संसारसमुद्रतारणाय प्रवहणसमान श्रीगुरोः सेवा कार्या गुरोः सेवा कु र्वतां च सतां य त्पुण्य मुत्पद्यते ॥ तत् पुण्यप्रसादात् उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥१२॥ पुनः गुरुसेवायाः फल माह ॥ पितामाता ० नरककुहरे ॥नरक विवरमध्ये ॥ निमज्जंतं बुडंतं पतंतं सतं ॥ जंतु जीवं गुरोःपरो ऽन्यः को पि रक्षितुं अलं न ॥ को पि न समर्थः ॥ कथं पिता जनको रक्षितुं नालं ॥ माता

श्री इतिजिनवरप्रक्रमः ४

जननी ना लं भ्राता सहोदरो ना लं ॥ प्रिया अत्यंत वल्लभा सहचरि स्त्री रक्षीतुं ना लं सुनुनिवहः पुत्रगणो पि रक्षितु ना लं ॥ सुहृत् मित्र मपि ना लं समर्थः ॥ स्वामी नायको पी ना लं ॥ किं भूत : स्वामी माद्यत्करीभटरथाऽश्व : ॥ माद्यंतो मदोन्मत्ता करिणो गजाः ॥ भटा सुभटा ॥ रथाः अश्वा श्च यस्य स एवं विधो ब लवान यो स्वामी रक्षीतुं ना लं ॥ पुनः परिकरः प्रभूत सेवकादिवर्गो पि नरके पतंतं सतं रक्षितुं अलं समार्था न ॥ किंतु एको गुरु रेव नरके पतंतं जीवं १२

रक्षितुं समर्थः गुरोः परः को पि नरके पतंतं जीवं रक्षितुं न समर्थः ॥ किंविशि ष्टात् गुरोः ॥ धर्माधर्मप्रकटनपरात् ॥ धर्म श्च अधर्म श्च धर्मा धर्मौ पुण्य पापे तयोः प्रकटने प्रकाशने पर स्तत्परो यः सः तस्मात् गुरु धर्मा धर्म्मौ द्वा व

अवद्यमुक्ते पथि यः प्रवर्त्तते

प्रवर्त्तयत्य न्यजनं च निस्पृहः स एव सेव्यः स्वहितै षिणा गुरुः

स्वयं तरं स्तारयितुं क्षमः परं ॥ १३ ॥

पि दर्शयति तत श्च यः प्राणी धर्म्मं मंगीकरोति ॥ स नरके न पतति ॥ किंतु सुगति भाग्भवती ॥ यतः नरयगयगमणपडिहछएकए ॥ तहपएसिणारन्ना ॥ अमर विमाणं पत्तं ॥ तंआयरियप्पभावेणं ॥ १ ॥ भो भव्यप्राणिन् एवं ज्ञात्वा मनसी

विवेक मानीय नरकपतनात् रक्षणीयः समर्थो गुरु रेव सेव्यः ॥ सेवमानानां च य
त्पुण्य मुत्पद्यते तत् पुण्य प्रसाद उत्तरोत्तरमांगालिक्यमाला विस्तरंतु ॥ १९ ॥ अ
थगुरो राज्ञायाः माहात्म्य माहे किंध्यानेन ० भो भव्याः गुरोः आज्ञां विना चेत्

विदलयति कुबोधं बोधय त्यागमार्थं ॥

सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ॥

अवगमयति कृत्याकृत्यभेदं गुरु र्यो ॥

ध्यानं कृतं तर्हि तेन ध्यानेन किं ॥ अपितु न किमपि फलं पुनः अशेषविषय
त्यागै र्भवतु पूर्णंजातं समस्तविषयणां परिहारेणा पि न किमपि फलं पुनः गु १३
रो आज्ञां विना तपोभिःकृतं षष्टा ष्टम दशम दुवालसादि पक्षक्षपण मासक्षपण

सिंहानि क्रीडितादिभिस्तपोभिः कृतं संपूर्णं जातं ॥ अर्था न्न किमपि पुन र्भावन
या शुभभावेना पि पूर्णं जातं पुनः इंद्रियदमैः पंचेंद्रियणां दमनैः कृत्वा अलं पूर्णं
जातं ॥ पुनः आप्तागमैः ॥ सूत्रसिद्धांतपठनै रपि पर्याप्तं पूर्णं जातं ॥ तर्हि किं

भवजलनिधिपोत स्तं विना ना स्ति क श्चित् ॥ १४ ॥

पिता माता भ्राता प्रियसहचरी सूनुनिवहः

सुहृ स्स्वामी माद्यत्करिभटरथाश्वः परिकरः ॥

किंतु गुरुप्रीत्या गारिष्टवात्सल्येन अधिकादरेण एकं गुरोः शाशनं कुरु ॥ गुरो रे
वा ज्ञांमुद्रां पालय ॥ किंभूतं गुरोः शासनं भवनाशनं ॥ संसार परिभ्रमणवारकं
यतो येनै केन गुरोः शासनेन ॥ आज्ञया विना सर्व्वे पि गुणाः ॥ पूर्व्वोक्ता

ध्यानादयः स्वार्थाय स्वस्वफलसाधनाय अलं न समर्था न किंतु निःफला इत्यर्थः ॥
किंवत् विनाथबलवत् निर्नायकसैन्यवत् यथा निर्नायकं सैन्यं जयसाधकं न ॥ तथा
गुरो आज्ञा विना क्रियानुष्ठानादिकं सर्व्वं निःफलं ॥ गोशालक जमालिकुल

निमज्जंतं जंतुं नरककुहरे रक्षितु मलं ॥
गुरो धर्म्मो धर्म्मप्रकटनपरा स्कोपि न परः ॥ १५ ॥
किं ध्यानेन भवत्व शेष विषयत्यागै स्तपोभि कृतं ॥

वालुक निन्हवादिवत् ॥ एवं ज्ञात्वा गुरोः आज्ञासहितं सर्व्वं कर्त्तव्यं ॥ य दुक्तं श्री
कल्पसूत्रे ॥ असणंवा ४ आहारित्तेए ॥ उच्चारंपासवणंवापरिठवेत्तए ॥ सजायंवाक १७
रित्तए ॥ धम्मजागरियंवाजागरित्तए ॥ णोसेकप्पइअणापुछित्ता ॥ भिक्खूइछेज्जाअ

न्नायरंतवोकम्मंउवसंपजित्ताणंविहरित्तए ॥ तंचेवसव्वंभाणियव्वं ॥ भो भव्यप्राणिन्
एवं ज्ञात्वा मनसि विवेक मानीय, श्रीगुरुसेवा कर्त्तव्या ॥ कुर्व्वतां च सतां य त्पुण्य
मुत्पद्यते ॥ तत्पुण्यप्रसादात् उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥ १९ सिंदूरप्रक

पूर्णं भावनया ल मिंद्रियदमैः पर्याप्त मात्वागमैः ॥
किं स्वेकं भवनाशनं कुरु गुरुप्रीत्या गुरो शासनं ॥
सर्व्वेःयेन विना विनाथबलवत्, स्वार्थाय नालं गुणाः ॥१६॥

राख्यस्य व्याख्यायां हर्षकीर्त्तिना ॥ सूरिणा विहितायां तु ॥ गुरुसेवनप्रक्रमः ॥ २
अथवतु र्भिर्वृत्तै जिनमतस्य जिनोक्तसिद्धांतस्य च माहात्म्य माह ॥ नदेव ॰ लो
काः जिनवचन मेव चक्षु र्नेत्रं तेन रहिता, संतः ॥ एतानि वस्तुनि न विलोकंते

न पश्यंति न जानंती त्यर्थः ॥ किं किं न त्रिलोकंते तें देवं सर्व्वज्ञं जितरागा दि रित्यादिलक्षणोपेतं न विलोकंते ॥ पुनः अदेवं कुदेवं ये स्त्री शस्त्राक्षसूत्रादाति लक्षणोपेतं कुदेवंन विलोकंते पुनः शुभगुरुं सुगरुं शुद्धप्ररूपकं गुरुं न जानंति ॥ पुनः

नदेवं नादेवं न शुभगुरु मेतं न कुगुरुं ॥
न धर्म्मं नाधर्म्मं न गुणपरिणद्धं न विगुणं ॥
न कृत्यं ना कृत्यं न हित महितं ना पि निपुणं ॥

कुगुरुं पंचाचार रहितं ॥ उत्सूत्रप्ररूपकं न जानंति पुनःधर्म्मं अधर्म्मं च न जानं ति ॥ धर्मा धर्मयो रंतरं न विदंति त्यर्थः ॥ पुनः गुणपरिणद्धं गुणैः ॥ परिपूर्णं गुणवंतं ॥ पुन विगुणं गुणरहितं निर्गुणं च न जानंति ॥ गुणवंतं निर्गुणं च स १८

दृशमेव पश्यंति पुनः कृत्यं करणीयं कर्त्तुं योग्यं वस्तुं न जानंति ॥ पुनः अकृत्यं कर्तुमनुचितं अयोग्यं च न जानंति कृत्या कृत्यं विवेकं न जानंति त्यर्थः ॥ पुन निपुणं सचातुर्यं च सम्यग् यथा स्या त्तथा आत्मनो हितं सुखकारणं न जानंति

विलोकंते लोका जिनवचनचक्षुर्विरहिताः ॥ १७ ॥
मानुष्यं विफलं वदंति हृदयं व्यर्थं वृथा श्रोत्रयो ॥
निर्माणं गुणदोषभेदकलानां तेषा मसंभविनीं ॥

पुनःअहितं च अशुभकारणं च न जानंति जिनवचनश्रवणं विना शुभा शुभयो रंत रं न जानंति ॥ यत ॥ सुच्चाजाणईकल्लाणं ॥ सुच्चाजाणईपावगं ॥ उभयंपिजाण इसुच्चा जंसेयंतंसमायरे ॥ १ ॥ अन्यच्च ॥ भो भव्यप्राणिन् एवं ज्ञात्वा श्रीजिनप्र

णीतसोद्धांतानां श्रवणं कर्त्तव्यं ॥ कुर्व्वतां च सतां च पुण्य मुत्पद्यते ॥ त त्पुन्यप्र
सादात् ॥ उत्तरोत्तरमांगलिक्यमाला विस्तरंतु ॥१७॥
मानुष्यं • ॥ सार्वज्ञः सर्वज्ञ प्रणीतः श्रीवीतरागदेवेन भाषीतः समय आगमो एषां

दुर्वारं नरकांधकूपपतनं मुक्तिं बुधा दुर्लभां ॥
सार्वज्ञः समयो दयारसमयो येषां न कर्णातिथिः ॥ १८ ॥
पीयूषं विषव ज्जलं ज्वलनव त्तेजस्तमस्तोमव ॥

पुरुषाणां कर्णातिथिः कर्णगोचरो न जातो ये न श्रुतः बुधाः पंडिता स्तेषां म
नुष्याणां मानुष्यं मनुष्यजन्म विफलं निःफलं वदंति लब्धमप्यलब्धं कथयंति तेषां
हृदयं चित्तं व्यर्थं निरर्थकं शून्यं वदंति ॥ पुन स्तेषां श्रोत्रयोः कर्णयो निर्मा

णं करणं वृथा निःफलं वदंति ॥ पुन स्तेषां गुणानां दोषाणां च यो भेदो अंतरं
तस्य कलनां विचारणां असंभाविनीं अर्थात् दुर्लभां वदंति ॥ पुनः नरक मेव अं
धकूप स्तृणवल्ली वितानाछादितः कूप स्तत्र पतनं दुर्व्वारं वारयितु मशक्यं कथय
ति ॥ पुनः स्तेषां मुक्तिं दुर्लभां कथयंति ॥ जिनागमश्रवणं विना मुक्तिं मोक्षं न

न्मित्रं शात्रववत् स्रजं भुजगवत् चिंतामणिं लोष्टवत् ॥
ज्योत्स्नां ग्रीष्मजघर्मवत् स मनुते कारुण्यपन्यापणं ॥

प्राप्नुवंति ॥ अतः श्रीजिनागमश्रवण मेव कर्त्तव्यं ॥ भावं विना पि श्रुतं हिता
य भवति ॥ यथा ॥ द्वेषे पि बोधकवचः श्रवणं विधाय स्या द्रौहिणेय इव जंतु
रुदारलाभकार्यो अप्रियो पि सरुजां सुखदो रवि र्वा संतापको पि जगदंगभृतां
हिताय ॥१॥ किं तद्वचः यतः अणमिसनयणाभणकज्जसाहणाः पुप्फदामअमिलाणा

चउरंगुलेणभूमिं ॥ नछिवंतिपुराजिणाविंती ॥ १ ॥ इति ज्ञात्वा जिनवचनस्य श्र वणं कर्त्तव्यं कुर्व्वतां च सतांयत् पुण्यमुत्पद्यते त त्पुण्यप्रसादात् उत्तरोत्तरमांगलि क्यमाला विस्तरंतु ॥ १८ ॥ पीयूषं ० ॥ यो दुर्मति मूर्खः पुमान् जिनेंद्रमतं श्रीजिनशासनं अन्यदर्शनसमं ॥ अन्यदर्शनै बौद्ध नैयायिक ॥ सांख्य ॥ वैशेषिक॥

जैनेंद्रं मत मन्यदर्शनसमं यो दुर्मति र्मन्यते ॥ १९ ॥
धर्म्मं जागरय त्यघ विदलय त्युत्थापय त्युत्पथं ॥

जैमानियादिभिः समं सदृशं मन्यते गणयति स मूर्षः ॥ पीयूषं ॥ अमृतं विषवत् विषेण तुल्यं मनुते गणयति ॥ पुन र्जलं परमशीतलं पानीयं ज्वलनवत् अग्नितु तुल्यं गणयति पुनः तेजः उद्योतं तमस्तोमवत् अंधकारपूंजवत् मनुते ॥ पुन मि त्रं सखायंशात्रववत् ॥ वैरिसदृशं मनुते जानाति पुनः ॥ स्रजं पुष्पमालां भुजगव १७

त् ॥ सर्प्पतुल्यां गणयति ॥ पुनः स चिंतामणि रत्नं लोष्टवत् पाषाणशदृशं गण यति ॥ पुनः स ज्योत्स्नां कौमुदीं चंद्रकांतिं ॥ ग्रीष्मजघर्मवत् उष्मकाल आ तपवत् मनुते ॥ अत्र पीयूषादिसमं जिनदर्शनं विषादिसदृशान्यन्यदर्शनानी त्युप नयः ॥ किंभूतं जैनेंद्रमतं कारूण्यपण्यापणं ॥ दयारूपक्रयाकस्य हट्टं ॥ एवं म

भित्ते मत्सर मुच्छिनत्ति कुनयं मथ्नाति मिथ्यामतिं ॥
वैराग्यं वितनोति पुष्यति कृपां मुष्माति तृष्मां च य ॥

त्वा श्रीजिनमत मेवं गीकर्त्तव्यं ॥ कुर्व्वतां च सतां य दुशेषं प्राग्वत् ॥ १९ ॥ धर्म्मज्ञा ० कृति पंडितः जैनं जैनेंद्र मतं श्रीजीनशासनं ॥ जिनोक्तप्रवचनं अ र्चती पूजयति ॥ पुनः प्रथ यति विस्तारयति ॥ पुन र्ध्यायति चिंतयति ॥ पुनः अधीते पठति ॥ तत् स धर्म्मं जागरयति ॥ धर्म्मस्य जागरणं दीपनं करोति ॥

पुनः अघं पापं विघटयति दूरीकरोति ॥ पुनः उत्पथं उन्मार्गं अनाचारं उत्थापयति निवारयति ॥ पुनः मत्सरं गुणिषु द्वेषभावं भित्ते भेदयति विनाशयति ॥ पुनः कुनयं कुत्सितनयं अन्यायं ॥ उच्छिनत्ति ॥ पुनः मिथ्यामतिं मथ्नाति ॥ कूटबुद्धिं विलोद्य दूरि करोति ॥ पुनः वैराग्यं वितनोति विस्तारयति ॥ पुनः कृपां दयां

त्त ज्जैनं मत मर्चति प्रथयति ध्यायत्य धीते कृती ॥ २० ॥

रत्नाना मिव रोहणक्षितिधरः खं तारकाणा मिव ॥

पुष्यति पोषयति ॥ पुनः तृष्णां स्पृहां लोभं मुष्णाति निराकरोति ॥ अर्थात् येन जिनमत माराधितं तेन एतानि वस्तुनि कृतानी त्यर्थः ॥ इति ज्ञात्वा श्रीजिनमतं ॥ जिनप्रणीतसिद्धांतं च सम्य गाराधनीयं ॥ आराधयंतां च सतां ॥२०॥ सिंदूरप्रकरारव्यस्य व्याख्यायां हर्ष कीर्त्तिना ॥ विहितायां जिनमत प्रक्रमः पूर्णतां मितः ॥ २८

॥२ ॥ इतिजिनमतप्रस्ताव ॥ अथ चतुर्भि र्वृत्तै संघस्य महिमा माह ॥ रत्नानामि० ॥ भो भव्याः इत्या लोच्य इति विचार्य्य भगवतः पूज्यस्य संघस्य पूजा विधिर्विरच्यतां क्रियतां ॥ इती ति किं ॥ यतः असौ संघः साधु साध्वी श्रावक श्राविका रूपश्चतुर्विधसंघः सर्व्वगुणानां ज्ञान दर्शन चारित्र विनयादीनां स्थानं निवा

स्वर्गः कल्पमहीरुहा मिव सरः पंकेरुहाणा मिव ॥

पाथोधिः पयसा मि शीव महसां स्थानं गुणाना मसा ॥

सः कः केषा मिवं ॥ रोहणक्षितिधरः ॥ रोहण श्चा सौ क्षितिधर श्च पर्व्वतः रत्नानामिव ॥ यथा रोहणा चलो रत्नानां स्थानं तथे त्यर्थः ॥ पुनः खं आकाशं तारकाणा मिव ॥ पुन र्यथा स्वर्गः कल्पमहीरुहां ॥ कल्पवृक्षाणां स्थानं तथे त्यर्थः पुन र्यथा सर स्तडागः पंकेरुहाणां कमलानां स्थानं तथा ॥ पुन र्यथा पाथोधिः समुद्र

पयसां पानीयानां स्थानं तथा ॥ किंभूतानां पयसां ॥ इंदुमहसां इंदुव निर्मलानां अथ वा शशी व महसां इति पाठः ॥ यथा शशी चंद्रो महसां तेजसां स्थानं ॥ तथा सौ संघो गुणानां स्थानं ॥ अथ वा किंभूतानां गुणानां इंदुमहसां इंदुवत् महो एषां तानि इंदुमहांसि स्तेषां ॥ एवं श्री चतुर्विधसंघः सर्वगुणानां स्थानं ॥

वित्या लोच्य विरच्यतां भगवतः संघस्य पूजाविधिः ॥२१ ॥
यः संसारनि रासलालसमति र्मुक्त्यर्थ मुत्तिष्ठते ॥

इति ज्ञात्वा श्री संघस्य भक्तिः कार्या कुर्वतां च सतां ० ॥ २१ ॥ यः संसार भो भव्याः भवद्भिः स श्री चतुर्विधसंघो अर्च्यतां ॥ पूज्यतां ॥ सः कः यः संघः संसारनिरासलालसमतिः सन् ॥ संसारस्य निरासे निराकरणे त्यागे लालसा इछा यस्याः सा ईदृशी मति र्बुद्धि र्यस्य स ईदृशः सन् ॥ मुक्त्यर्थं मुक्तिसाधनार्थं उति १९

ष्ठते सावधानो भवति ॥ पुन र्नः संघं पावन तथा पावित्र्येन तीर्थभूतं कथयंति पुनः येन संघेन समः सदृशान्य को पि नास्ति पुन र्यस्मै संघाय तीर्थपतिः तीर्थंकर ॥ स्वयं नमस्यति नमस्कारंकरोति ॥ व्याख्यानावसरे नमोतिढस्सेनिभणना

यं तीर्थं कथयंति पावनतया येना स्ति ना न्यः समः ॥
यस्मै तीर्थपति र्नमस्यतिसतां यस्माच्छुभं जायते ॥
स्फूर्त्ति र्यस्य परावसंति च गुणा यस्मि न्स संघो र्च्यतां २२

न् पुन र्यस्मात् संघात् सतां सज्जनानां शुभं कल्याणं जायते उत्पद्यते पुन र्यस्य संघस्य स्फूर्त्ति र्महिमा परो उत्कृष्टो वर्त्तते ॥ पुन र्यस्मिन् संघे गुणा गांभीर्य धैर्यो दार्यादयः ॥ मूलगुणोत्तरगुणा श्च वसंति तिष्टंति ॥ एवं ज्ञात्वा भो भव्यप्राणिन् मनसी विवेक मानीय श्रीसंघस्य पूजा भक्ति श्च प्रकर्त्तव्या कुर्वतां च सतां - २२

लक्ष्मी ॰ यः पुमान् श्रेयोरुचिः सन् ॥ श्रेयसि कल्याणे धर्म्मे वारुचि रभिलाषो
यस्य स श्रेयोरुचिः ईदृशं सन् श्री संघे सेवते तं पुरुषं लक्ष्मीः संपत् रभसा वेगेन
स्वय मात्मनाअभ्युपैति सन्मुखमायाति पुनः कीर्त्ति स्तं पुरुषं आलिंगति आलिंगनं

लक्ष्मी स्तं स्वय मभ्युपैति रभसा कीर्त्ति स्त मालिंगति ॥
प्रीति स्तं भजते मतिः प्रयतते तं लब्धुमुत्कंठया ॥
स्वःश्री स्तं परिरब्धु मिछति मुहु र्मुक्ति स्त मालोकते ॥

ददाते पुनः प्रीतिः स्नेह स्तं भजते सेवते पुन र्मति र्बुद्धिः उत्कंठया उत्सुकतया
कृत्वा तं नरं लब्धुं प्राप्तुं प्रयतते यत्नं करोति पुनः स्वश्री स्वर्गलक्ष्मी स्तं मुहु र्वा
रं वारं परिरब्धुं आलिंगितुं इछति मुक्ति र्मोक्ष स्तं पुरुषं आलोकति पश्यति किंवि २०

शिष्टं संघं गुणराशिकेलिसदनं गुणसमूहस्य क्रीडागृहं एवं ज्ञात्वा संघः सेव्यः २३
यद्भक्ते ॰ ॥स श्रीसंघः श्चरणन्यासैः स्वपादस्थानैः कृतासतां सत्पुरुषाणां साधुमनु
ष्याणां मंदिरं गृहं पुनातु पवित्रयतु ॥ सः कः यद्भक्ते र्यस्य संघस्य भक्तेः ॥ अ

यः संघं गुणराशिकेलि सदनं श्रेयोरुचिः सेवते ॥ २३ ॥
य द्भक्तेः फल मर्हदादिपदवी मुख्यं कृषेः सस्यवत् ॥
चक्रित्वं त्रिदशेंद्रतादि तृणवत् प्रासंगिकं गीयते ॥

र्हदादिपदवी तीर्थंकरादिपदप्राप्ती मुख्यं फलं वर्त्तते ॥ किंवत् कृषेः क्षेत्रादे सस्य
वत् धान्यवत् ॥ चक्रित्वं त्रिदशेंद्रतादि ॥ चक्रवर्त्तित्वं इंद्रपदत्वादिकंच प्रासंगिकं प्र
संगा दागतं फलं गीयते कथ्यते ॥ किंवत् ॥ कृषे तृणवत् ॥ पलालादिवत्

पुन र्यन्महिमस्तुतौ यस्य संघस्य प्रभावं वर्ण्यते वाचस्पते रपि वाचो वाण्यः शक्तिं सामर्थ्यं न दधते न धारयंति ॥ किंविशिष्टः संघः ॥ अघहरः ॥ अघं पापं हरतीति यः सः अघहर इति ज्ञात्वा : श्रीसंघः स्वगृहे आहूय सम्यक् पूजनीयः ॥ २४ ॥

शक्तिं य न्महिमस्तुतौ न दधते वाचो पि वाचस्पतेः ॥
संघः सोऽघहरः पुनातु चरणन्यासैः सतां मंदिरं २४
संघप्रक्रमः ४

सिंदूरप्रकराख्यस्य व्याख्यायां हर्षकीर्त्तिना सूरिणा विहितायां तु ॥ श्रीसंघप्रक्रमो ऽजनी ४ ॥ इतिसंघभक्तिप्रस्तावः ॥ अथ हिंसानिषेधेन सर्व्वसत्वेषु दयै व क्रियता मित्या ह ॥ क्रीडाभूः भो भव्याः सत्वेषु जीवेषु कृपा एव दया एव क्रियतां ॥ परैं २१

रन्यै रशेषैः समस्तैः क्लेशैः कायकष्टकरणैः भवतु पूर्यतां मा क्रियता मित्यर्थः ॥ कथंभूता कृपा ॥ सुकृतस्य पुण्यस्य क्रीडाभूः क्रीडास्थानं ॥ पुन कथंभूता ॥ दुःकृतरजः संहारवात्या ॥ दुःकृतं पापं तदेव कर्म मलहेतुत्वात् ॥ रज इव रज स्त

क्रीडाभूः सुकृतस्य दुःकृतरजःसंहारवात्या भवो ॥
दन्वन्नौ र्व्यसनाग्निमेघपटली संकेतदूती श्रीयां ॥
निःश्रेणि स्त्रिदिवौकसः प्रियसखी मुक्तेः कुगत्यर्गला ॥

स्य संहारे संहरणे वात्या वायु समुहतुल्या ॥ ॥ पुनः कथंभूता भवोदन्वन्नौः ॥ भव एव संसार एव उदन्वा निव उदन्वान् समुद्रः ॥ तत्र नौः नौका ॥ पुन कथंभूता व्यसनाग्निमेघपटली व्यसनानि कष्टानि ये व तापहेतुत्वात् अग्नयो वन्हयः तत्र मेघपटली

मेघघटासमाना पुनः किंभूता श्रेयां संपदां संकेतदूती संकेतस्थान प्रापका पुनः श्रीयां संकेत कादूति॥ पुनः कथंभूता ॥ त्रिदिवौकसः निश्रेणिः त्रिदिवं स्वर्गं एव उकोः गृहं ॥ तस्य सोपानं पंक्ति ॥ पुनः कथंभूता मुक्तेः ॥ प्रियसखी वल्लभवयस्या ॥

सत्वेषु क्रियतां कृपै व भवतु क्लेशैरशेषैः परैः २५

यदि ग्रावा तोये तरति तरणि र्यद्यु दयति ॥

प्रतिच्यां सप्तार्च्चि र्यदि भवति शैत्यं कथ मपि ॥

पुनः कथंभूता कुगत्यर्गला ॥ कुगतेः दुर्गतेः अर्गला द्वारपरिघः इति ज्ञात्वा जीवेषु कृपा क्रियतां ॥ २९ ॥ यदिग्रावेति ॥ यदि ग्रावाः पाषाणा तोये जले तरति पुन यदि तरणिः सूर्यः प्रतीच्यां पश्चिमायां दिशि उदयति ॥ पुनः यदि सप्ता २२

र्च्चि अग्निःशैत्यं शीतो भवति शीतलत्वं भजाति ॥ पुन यदि कथंचित् क्ष्मापीठं पृथ्वी मंडलं स कस्या पि जगतो विश्वस्य उपरिभवेत् ॥ तत् सत्वानां बाधाहिंसा का पि ॥ द्रव्यं क्षेत्र कालादौ सुकृतं पुन्यं न प्रसूते न जनयति ॥ २६ ॥ सकमलेति

यदि क्ष्मा पीठं स्या दुपरि सकलस्या पि जगतः ॥

प्रसूते सत्वानां तद पि न वधः क्वा पि सुकृतं २६

सकमलवन मग्नेर्वासरं भास्वदस्ता ॥

यः पुमान् प्राणिनां वधात् धर्म्मं इछेत् ॥ स अग्नेः सकाशात् ॥ कमलवनं अभिलषति वांछति ॥ तथा भास्वदस्तात् सूर्यास्तमनात् ॥ वासरं प्रभातं अभिलषति तथा उरगवक्त्रात् सर्प्पमुखात् ॥ अमृतं पीयूषं अभिलषति ॥ पुनः विवादात् कलहात्

साधुवादं कीर्त्ति अभिलषाति ॥ तथा अजीर्णात् रुगपगमं रोगस्य अपगमं विनाशं अ
भिलषाति ॥ पुनः कालकूटात् विषात् जीवितं प्राणधारणं अभिलषति ॥ यः पुमान्
जीवानां वधात् धर्म्मं इछेत् ॥ २७ ॥ आयु दीर्घतर मित्यादि ॥ कृपया आर्द्र

दमृत मुरगवक्रा त्साधुवादं विवादात्
रुगपगम मजीर्णा ज्जीवितं कालकूटा
दभिलषति वधा द्यः प्राणिनां धर्म मिछेत् २७
आयु दीर्घतरं वपु र्वरतरं गोत्रं गरीयस्तरं

अंतरं मध्यं यस्य ईदृशं चेतः ॥ आयु जीवितं दीर्घतरं अधिकं करोति ॥ तथा २३
वपुः शरीरं वरतरं अतिप्रधानं करोति तथा गोत्रं नाम कुलं वा गरीयस्तरं ॥ अ

ति गरिष्टं ॥ उच्चै र्गोत्ररूपं करोति ॥ तथा वित्तं धनं भूरितरं अतिप्रचूरं करोति
तथा बलंबहुतरं प्राज्य करोति ॥ तथा स्वामित्वं प्रभुत्वं उच्चैस्तरं सर्व्वोत्कृष्टं करो
ति ॥ तथा आरोग्यं निरोगत्वं ॥ विगतांतरं अंतररहितं करोति तथा त्रिजगतः

वित्तं भूरितरं बलं बहुतरं स्वामित्व मुच्चै स्तरं
आरोग्यं विगतांतरं त्रिजगति श्लाघ्यत्व मल्पेतरं
संसारांबुनिधिं करोति सुतरं चेतः कृपार्द्रांतरं २८

त्रिभुवनस्य श्लाघ्यत्वं श्लाघनीयत्वं अल्पेतरं प्रचूरं करोति ॥ तथा संसारांबुनिधिं भ
वसमूद्रं सुतरं सुखेन उत्तरितुं शक्यं करोति ॥ अत्र मेघरथराज्ञः हरिबलची वरस्य च
दृष्टांतः ॥ २८ ॥ सिंदुरप्रकराख्यस्य व्याख्यायां ॥ हर्षकीर्त्तिना सूरिणा विहितायां

तु हिंसायां: प्रक्रमो ऽव्रनि ॥ इति अहिंसा प्रस्तावः ॥ ५ ॥ अथ सत्यवचनस्य प्रभावं प्रकटयति ॥ विश्वासायतन मित्यादि ॥ भो भव्याः सत्यं वचो हितं प्रियं वचनं वदं त्विनि शेषः ॥ कथं भूतं सत्यं वच : विश्वासायतनं ॥ विश्वासस्य आयतनं स्थानं ॥ पुनः कथं भूतं सत्यं वचः ॥ विपत्तिदलनं ॥ विपत्तीनां आपदानां फे

अहिंसाप्रक्रमः ५

विश्वासायतनं विपत्तिदलनं देवै कृताराधनं ॥

टकं ॥ पुनः कथं ० देवैः सुरैः कृताराधनं ॥ कृतं आराधनं सेवनं यस्य तत् ॥ पुनः मुक्तेः सिद्धेः पथि मार्गे अदनं सबलं ॥ तया जलाग्निशमनं ॥ जलाग्न्यो उपशामकं ॥ पुनः व्याघ्रोरगस्तंभनं ॥ व्याघ्राणां सिंहाणां उरगाणां सर्पाणां च स्तंभकारकं ॥ पुनः श्रेयसो मोक्षस्य कल्याणस्य वा संवननं वशीकरणं ॥ पुनः समृद्धि २४

जननं ॥ समृद्धिनां संपदां संपादकं पुनः सौजन्यसंजीवनं ॥ सुजनतायाः संजिविनं समुत्पादकं तथा कीर्त्ते यशसः केलिवनं क्रीडारामं पुनः प्रभावभवनं ॥ प्रभावस्य महिम्नो गृहं पुनः पावनं ॥ पवित्रकारक मि त्यर्थः २९ यशो यस्मा दिति मति

मुक्तेः पथ्यदनं जलाग्निशमनं व्याघ्रोरगस्तंभनं ॥
श्रेयःसंवननं समृद्धिजननं सौजन्यसंजीवनं ॥
कीर्त्तेः केलिवनं प्रभावभवनं सत्यं वचः पावनं २९
यशो यस्मा द्भस्मीभवति वनवन्हे रिव वनं ॥

मान् बुद्धिमान् पुमान् कथंचित् कष्टे पि सति तत् मिथ्यावचनं असत्यवचनं न अभिवत्त न जल्पति तत् किं यस्मा न्मिथ्यावचना द्यशः कीर्त्ति र्भस्मीभवति विन

श्याति ॥ कस्मात् किं मिव वनवन्हे र्दावामे र्वन मिव यथा दावान लात् वनं भस्मीभवति तथा पुन र्यं न्मिथ्यावचनं दुःखानां निदानं कारणं केषां किं मिव अवनिरूहाणां वृक्षाणां जलं मिव यथा जलं वृक्षाणां कारणं तथा पुन र्यत्र मिथ्या

निदानं दुःखानां य दवनिरूहाणां जल मिव ॥
न यत्र स्या च्छायातप इव तपः संयमकथा ॥
कथंचि त्त न्मिथ्यावचन मभिधत्ते न मतिमान् ३०

वचने तपःसंयमकथा तपश्चारित्रयो र्वार्त्ता पि न कस्मिन् केव आतपे सूर्यातपे छाया इव यथा तपे छाया न स्यात् ३०

पुन रसत्यवचनस्य दोषा नाह असत्य मिति इति कारणात् कृतिभिः पंडितैः अ २५

सत्यं कूटं विशेषेण वर्ज्जितं परिहृतं यतो ऽसत्यं अ प्रत्ययमूलकारणं अविश्वासस्य मूलकेहेतु : पुनः कुवासनायाः पापबुद्धेः सद्म गृहं पुनः समृद्धिवारणं समृद्धे र्लक्ष्म्याः वारणं निराकारणं पुन र्विपन्निदानं विपदां कष्टानां निदानं कारणं पुनः पर

अ सत्य म प्रत्ययमूलकारणं ॥
कुवासनासद्मसमृद्धिवारणं ॥ विपन्निदानं परवंचनोर्जितं ॥
कृतापराधं कृतिभि र्विवर्जितं ॥ ३१ ॥

वंचनोर्ज्जितं. परेषां वंचने विप्रतारणे ऊर्ज्जितं बलिष्टं पुनः कृतापराधं कृतागसं कृतो अपराधो येन असत्येन तत् कृतापराधं अत एव असत्यवचनं कृतिभि पंडितैः न वक्तव्यं ३१ अथ सत्य प्रभावं दर्शयति तस्या भि रिति यः पुमान् सत्यां चितं

सत्ययुक्तं वचो वचनं वक्ति ब्रूते तस्यपुंसो ऽग्नि र्वन्हि: सत्यप्रभावा ज्जलं तथा ऽर्णव: समुद्र: स्थलं स्यात् तथा अरि: शत्रु र्मित्रं स्यात् पुन: सुरा: देवा: किंकरा: सेवका आदेशकारिण: स्यु: ॥ पुन: कांतार मरण्यं नगरं स्यात् ॥ तथा गिरि:

तस्या ऽग्नि र्जल मर्णव: स्थल मरि र्मित्रं सुरा:
किंकरा:कांतारं नगरं गिरि र्गृह महि र्माल्यं मृगारि र्मृग:॥
पातालं बिल मस्त्र मुत्पलदलं व्याल: शृंगालो विषं ॥

पर्व्वतो गृहं स्यात् ॥ पुन रहि: सर्पो माल्यं स्त्रक् स्यात् ॥ तथा मृगारि: सिंहो मृगो हरिण इव स्यात् ॥ तथा पातालं रसातलं ॥ विलं विलरूपं स्यात् तथा ऽस्त्रं शस्त्रं उत्पलदलं कमलपत्रसदृशं स्यात् ॥ तथा व्यालो दुष्टगज: शृंगाल इव २६

स्यात् पुन र्विषं हालाहलं पीयूषं अमृतं स्यात् ॥ तथा विषमं संकटं स्थानं संपद्रूपं स्यात् सत्यप्रभावत: ॥ अत: सत्यं वक्तव्यं ॥ ३२ ॥ अत्र वसुराज्ञा क्षीरकदंबकोपाध्यायपुत्रपर्व्वतक ॥ नारददृष्टांत: सिंदुरप्रकराख्यस्य व्याख्यायां ॥ हर्षकी

पीयूषं विषमं समं च वचनं सत्यांचितं वक्ति य: ३२
अनृतप्रक्रम: ॥ ६ ॥
त मभिलषति सिद्धि स्तं वृणीते समृद्धि ॥

र्त्तिना सूरिणा विहितायां तु ॥ मिथ्यावचनप्रक्रम: ॥ ६ ॥
अथ दत्तादानव्रत माह ॥ तमभि ० य: पुमान् अदत्तं अवित्तीर्णं प्रस्तावात् परवित्तं किंचिद्वस्तु वा न गृह्णाति ॥ तं पुरुषं सिद्धि र्मुक्तिर भिलषति वांछति

पुन स्तं समृद्धि श्वक्रित्वादिसंपत् वृणीते ॥ तथा कीर्त्ति यश स्तं अभिसराति प्र
त्यागछति ॥ भवार्त्तिः संसारपीडा तं मुंचाते त्यजाति ॥ तथा सुगति देवमनुष्य
रूपा तं स्पृहयाति वांछति तथा दुर्गाते नैरकतिर्यक् रूपा तं पुरुषं न पश्यति नेक्ष

स्त मभिसरति कीर्त्ति मुञ्चते तंभ वार्त्तिः
स्पृहयति सुगति स्तं नेक्षते दुर्गति स्तं ॥
परिहरति विप त्तं यो न गृह्णा त्य दत्तं ३३

ते ॥ विपद् आपद् तं परिहराति त्यजाति ॥ तं कं ॥ यो अदत्तं न गृह्णाति ३३
भूयो प्य दत्तादानस्यपरमगुणा नाह ॥ अदत्तमिति ० ॥ यः पुमान् कृतः सुकृते २७
पुन्ये अभिलाषो येन ईदृशः सन् ॥ अदत्तं परकीयं किमपि वस्तु न आदत्ते न गृह्णा

ति ॥ तस्मिन् पुंसि शुभश्रेणिः कल्याणपरंपरा वसाति निवासं करोति ॥ कस्मिन्
के व ॥ कमले कलहंसी व ॥ यथा कमले राजहंसी वसती तथा पुन स्तस्मात् पु
रुषात् ॥ विपत् कष्टं दूरं व्रजति ॥ दूरे याति कस्मात् के व ॥ अंबरमणेः सूर्यात्

अदत्तं ना दत्ते कृतसुकृतकामः कि मपि यः ॥
शुभश्रेणि स्तस्मिन् वसति कलहंसी व कमले ॥
विप त्तस्माद्दूरं व्रजति रज नीवां बरमणे ॥
विनीतं विद्ये व त्रिदिवशिवलक्ष्मी भंजति तं ॥ ३४ ॥

रजनी व ॥ यथा सूर्या द्रात्रि दूरे व्रजाति तथा ॥ पुन स्त्रिदिवशिवयोः स्वर्गापवर्गयो
लक्ष्मीः श्री स्तं भजाति सेवते कं के व ॥ विनीतं विद्ये व ॥ यथा विद्या विनीतं

विनयान्वितं पुरुषं विद्या भजति ॥ विद्या आगछति तथा ॥ ३४ ॥ व्यतिरेकेणा
ह ॥ यन्निर्वर्त्तित ॥ धीमान् ॥ विद्वान् पुमान् ॥ तत् अदत्तं ॥ परकीयं वस्तु न
जिघृक्षुति ॥ ग्रहितुं ने छति ॥ तत् किं यत् ॥ अदत्तं निर्वर्त्तितकीर्त्तिधर्मनिधनं स्या

यन्निर्वर्त्तितकीर्त्तिधर्मनिधनं सर्वागसां साधनं
प्रोन्मिलद्वधबंधनं विरचितक्लिष्टाशयोबोधनं ॥

त् ॥ निर्व्वर्त्तितं कृतं ॥ कीर्त्तिधर्मयो निधनं विनाशो येन तत् ॥ तथा सर्व्वागसां
साधनं ॥ सर्व्वाणि च तानि आगांसि तेषां सर्व्वागसां सर्व्वापराधानां साधनं हेतु
स्यात् ॥ पुनः प्रोन्मिलद्वधबंधनं ॥ वधो लकुटादिताडनं बंधो रज्वादिना बंधनं २८
प्रोन्मिलंति प्रकटीभवंति॥ वधबंधनानि यत्र तत् ॥ पुन विरचितक्लिष्टशयस्य ॥ दु-

ष्टाभिप्रायस्य उदद्बोधनं प्रकटनं येन तत् पुन दौर्गत्यैकनिबंधनं ॥ दौर्गत्यस्य दा
रिद्रस्य ॥ एकं अद्वितीयं निबंधनं कारणं ॥ पुनः कृतं सुगत्याश्लेषसंरोधनं ॥ कृ
तं सुगतै राश्लेषस्य आलिंगनस्य संरोधनं निवारणं येन तत् ॥ पुनः प्रोत्सर्प्पत् प्र

दौर्गत्यैकनिबंधनं कृतसुगत्याश्लेषसंरोधनं ॥
प्रोत्सर्प्पत्प्रधनं जिघृक्षति न त द्धीमान दत्तं धनं ॥ ३५ ॥
परजनमनः पीडा क्रीडावनं वधभावना ॥

धनं ॥ प्रोसर्प्पत् प्रसरत् प्रधनं मरणं यस्मात् त त्तथा ॥ इदृशं अदत्तं धीमान् न
जिघृक्षति ॥३५॥ पुन रदत्तदोष माह ॥ परजन ० ॥ नियतं निश्चितं हितकां
क्षिणां हितवांछितां नृणां पुरुषाणां ॥ स्तेयं चौर्य्यं अनुपादेयं अग्राह्यं भवति ॥ अ

दत्तं अग्रहणीयं स्यात् ॥ किंभूतं अदत्तं ॥ परे च ते जनाश्च ॥ तेषां मनांसि चित्तानि तेषां पीडा बाधा तस्याः क्रीडावनं ॥ रमणायो द्यानं ॥ पुनः वधभावना भवनं ॥ वधस्य हिंसायाः भावना चिंतनं तस्याः गृहं ॥ पुनः अवनिव्यापि व्याप

भवन मवनिव्यापि व्यापल्लता घनमंडलं ॥
कुगतिगमनेमार्गः स्वर्गापवर्गपुरार्गलं ॥
नियतमनुपादेयं स्तेयं नृणां हितकांक्षिणां ॥ ३६ ॥

ल्लताघनमंडलं अवन्यां व्यापिनी प्रसरणशीला या व्यापत् ॥ आपत् सैव लता व ल्ली तस्याः घनमंडलं मेघपटलं ॥ पुनः कुगति गमने मार्गो अध्वा ॥ पुनः स्व र्गापवर्गपुरार्गला ॥ स्वर्गा पवर्गा वेव देवलोकमोक्षा वेव पुरं नगरं तत्र अर्गला प २९

रिघः ॥ ईदृशं स्तेयं हितकांक्षिणां नृणां अग्राह्यं स्यात् ॥ ३६ ॥ सिंदूरप्रकरा ख्यस्य टीकायां हर्षकीर्त्तिभिः ॥ सूरिभि र्विहितायां तु ॥ संपूर्णः स्तेय प्रक्रमः ॥ रोहिणिया कथा ॥ ७ ॥ अथ मैथुन व्रत माश्रित्यो पदेश माह ॥ दत्त इति ॥ यः

स्तेयप्रक्रमः ॥ ७ ॥

दत्त स्तेन जगत्य कीर्त्तिपटहो गोत्रे मषीकूर्चक ।
श्चारित्रस्य जलांजली गुणगणारामस्य दावानलः
संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः

पुमान् कामार्त्तः कामपीडितः परस्त्रीं परनारीं न त्यजति तेन पुंसा जगति विश्वे अकीर्त्तिपटहो दत्तः वादितः निर्मले गोत्रे स्वकीये वंशे मषी कूर्चको दत्तः पुनः

चारित्रस्य देशविरति सर्वविरति रूपसंयमस्य जलांजालि र्दत्तः गुणानां गणः स
मूह एव आरम स्तस्य दावानलो वन दवः वन दवाग्नि र्दत्तः पुन स्तेन सकलापदां
समस्तकष्टानां संकेतो दत्तः मिलनस्थानं कथितं पुन स्तेन शिवपुरद्वारे मुक्तिन

शीलं येन निजं विलुप्त मखिलं त्रैलोक्यचिंतामणिः
पाठांतरं कामार्त्ते स्त्यजति प्रबोधयति वा स्वस्त्रीं परस्त्रीं न यः ३७
व्याघ्रव्यालजलानलादिविपद स्तेषां व्रजंति क्षयं

गरीद्वारे दृढः कपाटो दत्तः शीलरहितस्य मुक्तिगमनायोगात् पाठांतरे तु ॥ शी
लं तेन निजं विलुप्त मखिलं त्रैलोक्यचिंतामणिः ॥ येन निजं शीलं विलुप्तं ते ३०
न एतानि सस्तुनि ॥ ३७ ॥शीलगुणानाह ॥ व्याघ्रेति ० येन राः शीलं ब्रह्मच

र्यं आबिभ्रते धरंति ॥ तेषां पुंसां व्याघ्रव्यालजलानलादि विपदः क्षयं यांति ॥ व्या
घ्राप्रसिद्धः ॥ व्यालो दुष्टगजः सर्पोवा जलं पानीयं नदि समुद्रादि ॥ अनलो
वन्हि स्तेषां विपदः कष्टानि ॥ तैःकृता विपदः क्षयं व्रजंति क्षयं यांति पुनः क

कल्याणानि समुल्लसंति विबुधाः सांनिध्य मध्यासते
कीर्त्ति स्फूर्त्ति मियर्त्ति या त्युपचयं धर्मः प्रणस्य त्यघं
स्वर्निर्वाणसुखानि संनिदधते ये शील माबिभ्रते ३८

ल्याणानि श्रेयांसि समुल्लसंति वृधिं प्राप्नुवंति ॥ पुन स्तेषां विबुधा देवाः सान्नि
ध्यं अध्यासते ॥ साहायं कुर्वंति ॥ पुन स्तेषां कीर्त्तिः स्फुर्त्ति इयर्त्ति विस्तारं यां
ति पुन स्तेषां धर्मो दानादि विधि रुपचयं पोषं याति ॥ पुन स्तेषां अघं पापं

प्रणश्यति नाशं याति ॥ पुन स्तेषां स्वर्निर्वाणसखानि स्वर्गाऽपवर्गसुखानि सांनिद धते समीप मायांति ॥ ये शीलं बिभ्रत तेषां एतानि भवंति ॥ ३८ ॥ पुन श्च हरति कुले ति ॥ शुचि निर्मल शीलं ब्रह्म व्रतं ॥ कुलस्य कलंकं मलिनतां ह

हरति कुलकलंकं लंपते पापपंकं
सुकृत मुपचिनोति श्लाघ्यता मातनोति
नमयति सुरवर्ग हंति दुर्गोपसर्ग

रति नश्यति ॥ पुनः शीलं पाप मेव पंकं कर्दमं लुंपति छिनत्ति ॥ पुनः शुचि निर्मलं शुद्धं शीलं सुकृतं पुण्यं उपचिनोति वर्द्धयति ॥ पुन श्लाघ्यतां प्रशस्यतां आ तनोति विस्तारयति ॥ पुनः शीलं सुरवर्गं नमयति ॥ देवसमुहं नम्रीकरोति पुनः ३१

शीलं दुर्गोपसर्गं रौद्रोपसर्गं उपद्रवं हंति ॥ पुनः शीलं कर्तृसलीलं यथा स्या त्तथा लीलयै व हेलामात्रेण स्वर्गमोक्षौ रचयति ददातीत्यर्थः ॥ ३९ ॥ पुनः शीलात् इह लोके पि कष्टानि यांती त्याह ॥ तोय त्यग्नि रिति ॥ नृणां मनुष्याणां ध्रुवं नि

रचयति शुचिशीलं स्वर्गमोक्षौ सलीलं ३९.
तोय त्यग्नि रपि स्रज्य हि रपि व्याघ्रो पि सारंगति
व्यालो प्य श्वति पर्वतो प्यु पलति क्ष्वेडो पि पीयूषति

श्चितं शीलप्रभावत् अग्नि रपि ॥ तोयति तोय मिवा चरति ॥ जलवत् शीतलं स्यात् ॥ तथा अहि रपि सर्पो पि स्रजति ॥ स्रक् इव पुष्पमाले व आचरति ॥ पुनः शील प्रभावात् ॥ व्याघ्रो पि सिंहो पि सारंगति ॥ सारंग इव हरिण इ

वा चरति ॥ पुन र्व्यालो पि दुष्टगजो पि अश्वति ॥ अश्व इवा चरति विषमः प र्व्वतो पि उपलति उपली वा चरति सामान्यपाषाण इवा चरति क्ष्वेडो विषं पी यूषति अमृतं भवति विघ्नो प्यं तरायो पि आपदपि उत्सवति उत्सव इवा चरति

विघ्नो प्यु त्सवति प्रिय त्यरि रपि क्रीडातडाग त्यपां

नाथो पि स्वगृहत्य टव्य पि नृणां शीलप्रभावा ध्रुवं ४०

विघ्नो प्युत्सव एव भवति तथा अरि रपि शत्रू रपि प्रियति प्रिय इवा चरति शत्रु रपि प्रिय एव भवति तथा अपां नाथो पि समुद्रो पि क्रीडातडागति क्रीडातडाग इवा चरति खेलनसरोवर मिवा चरति अट व्यपि अरण्य मपि स्वगहति स्वगृह मि वा चरति नृणां शील प्रभावा देतानि वस्तुनि भवंति ।४८ अत्र सुदर्शन श्रेष्टि क ३२

था १ वंकचूलकथा २ रावणकथा ३ इति सिंदुरप्रकराख्यस्य व्याख्यायां हर्ष कीर्त्तिभिः ॥ सूरिभि विहितायां तु शीलस्य प्रक्रमो ऽजनि ॥ ४ ॥ ८ ॥
अथ परिग्रहदोष माह कालुष्य मिति ॥ परिग्रहो धन धान्य क्षेत्र गृह रूपा सुवर्ण कुप्य द्विपद चतुःपदानां संग्रहो मुर्छासि एव नदीपूरः ॥ सरित्प्रवाहः प्रवृद्धिं ग

अब्रह्मप्रक्रमः ॥ ४ ॥ ८ ॥

कालुष्यं जनयन् जडस्य रचयन् धर्म्मद्रुमो न्मूलनं ॥

तः उपचयं प्राप्तः सन् ॥ किं क्लेशकरः कष्टदा ऽयी न स्यात् ॥ अपि तु स्या देव किं कुर्व्वन् जडस्य परिग्रहंसंग्रहं कर्तुं ॥ मूर्खजनस्य कालुष्यं क्लिष्टाध्यवसायत्वं ॥ जनयन् उत्पादयन् ॥ अन्यो पि नदीपूरो वृद्धः सन् जलस्य पानीयस्य ॥ कालुष्यं आविलत्वं जनयति ॥ डलयोरैक्यं जडस्य जलस्य ॥ पुनः किं कुर्व्वन् ॥ धर्म्म

एव द्रुमो वृक्ष तस्यो न्मूलं उत्पाटनं ॥ रचयन् कुर्व्वन् अन्यो पि नदिपुरः ॥ प्रवृद्धो वृक्षाणां उत्पाटनं करोति ॥ पुनः किं कुर्व्वन् ॥ नीति कृपा क्षमा कमलिनी ॥ नीति र्न्यायः कृपा दया क्षमा क्षांतिः ॥ ता एव कमलिन्यः ताः क्लिश्यन् ॥ पीडयन् ॥ अन्यो पी नदिपूरः ॥ कमलिनीः ॥ पीडयति ॥ पुनः किं कुर्व्वन् ॥

क्लिश्यन्नीतिकृपाक्षमाकमलिनी लोभांबुधिं वर्द्धयन् ॥
मर्यादातट मुद्रुजन् शुभमनो हंसप्रवासं दिशन् ॥

लोभांबुधिं वर्द्धयन् ॥ लोभ एव अंबुधिः समुद्रस्तद्वर्द्धयन् ॥ वृद्धिं नयन् जहाला होतहालोहो ॥ लाहालोहोपवड्ढई दोमासकणयंकज्जं ॥ कोडिएविनानिय दियं ॥ १ इति पुनः किं कुर्व्वन् ॥ धर्मस्य मर्यादा एव तटं चरणविविरूपं तटं उद्रुजन् पीडयन् भंजन् ॥ अन्यो पी नदिपूरः प्रवृद्धः सन् ॥ तटं पातयति ॥ पुनः किं कु 33

र्व्वन् ॥ शुभमनो हंसप्रवासं दिशन् ॥ शुभं धर्मध्यानसहितं यन्मन स्त देव हंस स्तस्य प्रवासं परदेशगमनं दिशन् आदिशन् अन्यो पि नादिपूरो हंसान् उडापयति इदृशो मूर्छापरिग्रहः ॥ क्लेशकरं स्यात् ॥ ४१ ॥ भूयो पि परिग्रहदोषा नाह क

किं न क्लेशकरः परिग्रहनदीपूरः प्रवृद्धिं गतः ॥ ४१ ॥
कलहकलभविंध्यः क्रोधगृध्रश्मशानं ॥
व्यसनभुजगरंध्रं द्वेषदस्युप्रदोषः ॥

लहे ति ॥ अत्यर्थं अर्थानुरागः ॥ परिग्रहो परिमूर्छारागः ईदृशो स्ति ॥ कथंभूतः कलह एव कलभो बालहस्ती तस्य विंध्यो विंध्याचलः ॥ यथा विंध्याचलेकलभः क्रीडति ॥ तथा अत्यर्थं अर्थानुरागे द्रव्यरागे कलहो भवति ॥ तथा क्रोधगृध्रश्मसानं

क्रोध एव गृध्रः ॥ पक्षिविशेष स्तस्य श्मशानं प्रेतवनं ॥ गृध्र श्मशाने रमते तथा
त्र क्रोधः पुनः व्यसन मेव कष्ट मेव भुजगसर्प्प स्तस्य बिलं पुन र्द्वेष एव दस्यु श्चौ
र ॥ स्तस्य प्रदोषः संध्यासमयः ॥ प्रदोषे चौराणां बलं भवति ॥ तथा पुनः सु

सुकृतवनदवाग्नि र्मार्द्दवांभोदवायु ॥
र्नयनलिनतुषारो ऽत्य र्थ मर्थानुरागः ॥ ४२ ॥

कृत मेव पुन्य मेव वनं तस्य दवाग्नि र्दावानलः ॥ पुन र्मार्द्दवांभोदवायुः मार्द्दवं
मृदुत्वं कोमलत्वं तदेव अंभोदो मेघ स्तत्र वायुः पुन र्नयो न्याय एव नलिनं कमलं
तत्र तुषार इव तुषारो हिमं अत्यर्थं द्रव्यानुरागो लोभो ॥ ईदृशो स्ति ॥ अतो न ३४
कर्त्तव्यः ॥ ४२ ॥ पुनः परिग्रहदोष माह ॥ भो भव्याः अयं परिग्रहो मूर्छाधि

क्यं विविक्तात्मनां विवेकवतां पुंसां परिहृतेः ॥ परिहारस्य योग्यः ॥ कीदृशः प्रशम
स्यो पशमस्य प्रत्यर्थी शत्रुः पुनः अधृतेः असंतोषस्य मित्रं सुहृत् ॥ पुन र्मोहस्य
मूढस्य मोहनीयकर्मस्यै व विश्रामस्थानं ॥ पुनः पापानां अशुभकर्मणां खनिः खा

प्रत्यर्थी प्रशमस्य मित्र मधृते र्मोहस्य विश्रामभूः ॥
पापानां खनि रापदां पद मस ध्यानस्य लीलावनं ॥
व्याक्षेपस्य निधि र्मदस्य सचिवः शोकस्य हेतुः कलेः ॥

निः पुन रापदां कष्टानां पदं आस्पदं ॥ पुन रसद्ध्यानस्य आर्त्तरौध्यानस्य लीलावनं
क्रीडावनं ॥ पुन र्व्याक्षेपस्य व्याकुलत्वस्य निधि र्निधानं ॥ पुन र्मदस्य अहंकारस्य
सचिवो मंत्री पुनः शोकस्य हेतुः कारणं पुनः कलेः कलहस्य केलीवेश्म क्रीडागृह

मित्यर्थः ॥ ४३ ॥ वन्हि रिति ॥ यथा वन्हि रग्निः धनै रपि इंधनैः समिद्धि नै तृप्यति ॥ न तृप्तिं याति ॥ पुन र्यथा अंभोनिधिः ॥ समुद्र : ॥ अंभोभि र्जलैः कृ त्वा न तृप्यति ॥ तद्वत् यो जंतु प्राणी जातु कदाचित् घनै रपि बहुभि र्धनै र्द्र

केलीवेश्म परिग्रहः परिहृते योग्यो विविक्तात्मनां ४३
वन्हिस्तृप्यति नै धनै रिह यथा नांभोभि रंभोनिधि ॥
स्तद्वन्मोहघनो धनै रपि धनै र्जंतु नै संतुष्यति ॥

व्यैः कृत्वा न संतुष्यति ॥ कथं भूतो जंतुः ॥ मोहेन घनो निबडः ॥ तु पुनः जंतुः एवं न मनुते न जानाति ॥ य दयं आत्मा जीवो ॥ निःशेषं समस्तं विभवं द्रव्यं विमु ३९
च्यत्यक्ता अन्यं भवं अपरं जन्म परभवं याति ॥तस्मात् कारणात् अहं मुधैव वृथैव

भूयांसि प्रचूराणि एनांसि पापानि किं किमर्थं ॥ विदधामि करोमि ॥ एवं न जानाति ॥ ९ ॥ नंदराजा कथा ॥ ४४ ॥ सिंदुरप्रकराख्यस्य व्यांख्यायां हर्ष र्तिभिः सूरिभि र्विहितायां तु प्रक्रमोयं परिग्रहे ॥ ४ ॥ ९ ॥ अथ क्रोधजयार्थ

न त्वेवं मनुते विमुच्य विभवं निःशेष मन्यं भवं ॥
यात्यात्मात दहं मुधै व विदधा म्येनांसि भूयांसि किं ४४
परिग्रहप्रक्रमः ४ ॥ ९
यो मित्रं मधुनो विकारकरणे संत्राससंपादने ॥

मुपदेश माह ॥ यो मित्र ० ॥ भो लोकाः कुशला अभिलाषकुशलैः आत्मनः श्रेयो वांछाचतुरै र्नरैः स क्रोधः कोपो निर्मूल समूलं यथा स्या त्तथा उन्मूल्यतां उच्छिद्य

तां ॥ सक:य: क्रोध: विकारकरणे ॥ चित्तादि विकारविधाने ॥ मधुनो मद्यस्य मित्रं सुहृत् ॥ पुन र्यः क्रोध संत्राससंपादने भयजनने ॥ सर्प्पस्य प्रतिबिंबं सर्प्पसदृशं पुन र्यः क्रोधो ऽंगदहने ॥ शरीरप्रज्वालने ॥ सप्तार्चिषो ऽग्नेः सोदरः अग्ने र्भ्रा

सर्प्पस्य प्रतिबिंब मंगदहने सप्तार्चिषः सोदरः
चैतन्यस्य निषूदने विषतरोः सब्रह्मचारीचिरं
स क्रोधः कुशलाभिलाषकुशलैः प्रोन्मूल मुन्मूल्यतां ४५
फलति कलितश्रेयः श्रेणीप्रसूनपरंपरः

ता पुन र्यः क्रोध श्चै तन्यस्य ज्ञानस्य निषूदने नाशने विषतरो विषवृक्षस्य चिर मतिशयेन सब्रह्मचारी सार्धी ४५ फलती ० तपश्चारित्ररूप एव द्रुमो वृक्षः मुक्तिं ३६

मोक्षं फलति निष्पादयति कथंभूतः कलितश्रेयः श्रेणीप्रसूनपरंपरः कलिता उत्पादिता श्रेयसां पुन्यानां कल्याणानां श्रेणिः राजि रेव प्रसूनानां पुष्पाणां परंपरा पंक्ति र्येन स ० पुनः कथंभूतः प्रशमपयसा उपशम एव जलं तेन सिक्तः सेकं

प्रशमपयसा सिक्तो मुक्तिं तपश्चरणद्रुमः यदि पुन
रसौ प्रत्यासत्तिं प्रकोपहविर्भुजो ॥
भजति लभते भस्मीभावं तदा विफलोदयः ४६

प्रापितः यदि पुनः परंतु असौ तपश्चरणद्रुमः प्रकोपहविर्भुजः क्रोधवन्हेः प्रत्यासत्तिं समीपं भजति आश्रयति तदाभस्मीभावं भस्मरूपतां लभते प्राप्नोति कथंभूतः विफलोदयः विगतः फलस्य उदयो यस्य फलोदयरहितः ४६ पुनः क्रोधस्य दोष

माह संताप मिति ० स रोषः क्रोधः सतां सत्पुरुषाणां हातुं त्यक्तुं उचितो योग्यो स्ति कथंभूतः रोषः सदोषः अनेकदोषैः सहितः सः कः यो रोषः संतापं चित्तो द्वेगं तनुते विस्तारयति पुन यो रोषो विनयं विनयगुणं भिनत्ति विदारयति विना

संतापं तनुते भिनत्ति विनयं सौहार्द मुत्सादय ॥
त्युद्वेगं जनय त्यवद्यवचनं सूते विधत्ते कलिं ॥
कीर्त्तिं कृंतति दुर्म्मतिं वितरति व्याहंति पुन्योदयं ॥

३७

शयति सौहार्दं मित्रभावं उत्सादयति विनाशयति पुन यः उद्वेगं उच्चाटं जनयति अवद्यवचनं असत्यवचनं सूते उत्पादयति पुन यः कलिं कलहं विधत्ते करोति पुन यो रोष कीर्त्तिं यशः कृंतति छिनत्ति पुन दुर्मतिं दुष्ट बुद्धिं वितरति दत्ते पुनः

पुन्योदयं धर्मस्य उदयं व्याहंति विनाशयति पुन यः कुगतिं नरकतिर्यग्गतिं दत्ते स रोषः सतां हातुं उचितः ४७ यो धर्म्मं मिति ० स कोपः क्रोधः कथं केनो पायेनो चितो योग्यः स्यात् अपितु न कथ मप्यु चितः सः कः यः कोपो धर्म्मः

दत्ते यः कुगतिं स हातु मुचितो रोषः सदोषः सतां ४७
यो धर्म्मं दहति द्रुमं दव इवो न्मथ्नाति नितिं लतां ॥
दंति वें दुकलां विधिंतुद इवक्लिश्नाति कीर्त्तिं नृणां ॥

श्रेयो दहति भस्मी करोति ॥ कः क मिव दवो दावानलो द्रुम मिव ॥ यथा दावा नलो द्रुमं वृक्षं दहति ॥ पुनः योनीतिं न्यायं उन्मथ्नाति उन्मूलयति ॥ कः का मिव दंती हस्ती लता मिव ॥ यथा हस्ती लता मुन्मूलयति ॥ नृणां मनुष्याणां

कीर्त्तिं क्लिष्णाति ॥ पीडयति गमयति कः का मिव विधिंतुदो राहु रिंदुकलां चंद्रलेषा मिव ॥ पुन र्यो रोषः स्वार्थं विघटयति स्फेटयति ॥ कः का मिव ॥ वायु रंबुद मिव यथा वायु र्मेघं विघटयति ॥ पुन र्यः आपदं कष्टं उल्लासयति

स्वार्थं वायु रिवां बुदं विघटय त्युल्लासयत्या पदं ॥
तृष्णां घर्म इवो चितः कृत कृपालोपः स कोपः कथं ४८
क्रोधप्रक्रमः ४ १०

विस्तारयति ॥ कः का मिव ॥ घर्मः ग्रीष्म स्तृष्मा मिव यथा तपि स्तृषां वर्द्धयति ॥ कथं भूतः कोपः कृतः कृपायाः लोपो विनाशो येन स ० ॥ ४८ ॥ सिंदूरप्रकराख्यस्य वाख्यायां ॥ हर्ष कीर्त्तिभिः सूरिभिर्विहितायांतु ॥ क्रोधस्य प्रक्रमो

२८

अजनि ॥ ४ ॥ १० ॥ अथ मानस्य अहंकारदोषानाह ॥ यस्मा दिति ॥ भो भव्यप्राणिन् औचित्यवृत्तेः उचिताचारकरणात् ॥ त त्त योग्यविनयविधानात् तं मानाद्रिं मान एव अहंकार एव अद्रि स्तं अहंकारपर्व्वतं परिहर ॥ त्यज ॥

यस्मादा विर्भवति वितति र्दुस्तरापन्नदीनां ॥
यस्मिन् शिष्टाभि रुचितगुणग्रामनामापि

मुंच ॥ तं कं ॥ यस्मा न्मानाद्रे र्दुस्तरा तरीतुं अशक्या आपन्नदीनां कष्टरूप नदीनां विततिः ॥ श्रेणि राविर्भवति ॥ प्रकटी भवति ॥ अन्यस्मा द्प्य द्रे र्नदी विततिः प्रादुर्भवति ॥ तथा यस्मिन्मानाद्रौ शिष्टाभि रुचितगुणग्रामनामा पि ना स्ति ॥ शिष्टानां उत्तमानां अभिरुचिताः ॥ प्रीतिदायिनो ये गुणा ज्ञानादयः

औदार्यादयो वा ॥ तेषां ग्रामः ॥ समूह स्तस्य नामापि नास्ति गुणानां लवलेशो पि न पुन र्यो मानाद्रिः क्रोधदावं क्रोधदावा नलं वहति धत्ते यः ॥ कथंभूतं क्रोध दावं वधधीधूम्यया व्याप्तं ॥ हिंसाबुद्धिधूमसमूहेना लीढं पुनः कथंभूतं क्रोधदावं

नास्ति य श्च व्याप्तं वहति वधधीधूम्यया क्रोधदावतं तं
मानाद्रिं परिहर दुरा रोह मौचित्यवृत्तेः ४९

दुरारोहं आरोढु मशक्यं ॥ अथवा औचित्यवृत्तेः योग्यतायाः दुरारोहं ॥४९॥
भूयो पि मानदोष नाहः ॥ ३९
शमाला शिति मदेन अहंकारेण अंधो ॥ गतभावेक्षणो जनः ॥ कं कं अनर्थं न

जनयति नो त्पादयति ॥ अपि तु सर्व्वं अनर्थं जनयति ॥ क इव द्विप इव ॥ म त्तगज इव ॥ यथा मदांधो द्विपो ऽनर्थं उपद्रवं जनयति ॥ किं कुर्व्वन् शमालानां भंजन् शम एव उपशम एवा लानं ॥ गजबंधनस्तंभस्तं भजन् उन्मूलयन् ॥ पुनः किं कुर्व्वन् विमलमतिनाडीं निर्मलबुद्धि मेव नाडीं ॥ बंधनरज्जुं विघटयन् त्रोटय

शमालानं भंजन् विमलमतिनाडीं विघटयन्
किरन् दुर्व्वाक्पांशूत्कर मगणय न्नागमसृणिं ॥
भ्रमन् नुर्व्यां स्वैरं विनयनयवीथीं विदलयन्॥

पुनः किं कुर्व्वन् ॥ दुर्व्वाक्पांशूत्करं दुर्वागे व ॥ दुर्वचन मेवपांशु धूलि स्तस्याः उत्करं समूहं किरन् विक्षिपन् ॥ पुनः आगम एव सिद्धांत एव सृणिः अंकुश स्तं अगणयन् ॥ अविचारयन् अवमानयन् उर्व्यां पृथ्व्यां स्वैरं स्वेछया भ्रमन् विचरन् ॥

पुन विनयनयावीथि ॥ विनय एव नयवीथी न्यायश्रेणी स्तां विदलयन् विध्वसयन्
अन्यो पि मदांधो हस्ति एतानि वस्तुनि करोति ॥ ९० ॥
पुन राह मानो अहंकारो नृणां पुसां ॥ त्रिवर्गं धर्मार्थकामरूपं हंति नाशयाति ॥ कः

जनः कं नानर्थं जनयति मदांधो द्विप इव ५०
औचित्याचरणं विलुंपति पयोवाहं नभस्वानिव
प्रध्वंसं विनयं नयत्य हि रिव प्राणस्पृशां जीवितं

क मिव नीचः मनुष्यः उपकार निकर मिवयथा नीचः उपकार समूहं हंति तथा
पुन मानः औचित्याचरणं योग्याचारं विलुंपति स्फेटयति ॥ कः क मिव नभस्वा ४०
न् वायुः पयोवाह मिव पुन मानः प्राणस्पृशां प्राणिनां विनयं अभ्युछानादिकं प्रध्वंसं

क्षयं नयति ॥ कः क मिव अहि सर्प्पो जीवित मीव ॥ यथा सर्प्पो जीवितं क्षयं
नयति ॥ पुन रंजसा वेगेन कीर्त्तिं प्रोन्मूलयति ॥कः का मिव ॥ मतंगजो हस्ति
कैरविणीं ॥ कमलिनीं प्रोन्मूलयति ९१ ॥ भूयः श्चाह ॥ मुष्नाती ति ॥ यो

कीर्त्तिं कैरविणीं मतंगज इव प्रोन्मूलय त्यंजसा
मानो नीच इवो पकारनिकरं हंति त्रिवर्गं नृणां ५१
मुष्नाति यः कृतसमस्तसमीहितार्थं ॥

मानो अभाजो प्राणिनां विनयजीवितं विनयगुणरूपं जीवितं ॥ मुष्नाति उछिन
त्ति ॥ कथंभूतं विनयजीवितं ॥ कृत समस्तसमीहितार्थसंजीवनं ॥ कृतं समस्ता
नां समीहितां ॥ वांछितार्थानां संजीवनं येन तत् ॥ तं जात्यादिमानविषजं नाति

लाभकुलैश्वर्यबलरूपतप : श्रुतानां मानो अहंकार स एव विषंतस्मा त्समुद्भवं उत्पन्नं विषमं घोरं विकारं मार्दवाऽमृतरसेन मृदुतासुधारसेन ॥ शांतिंउपशमं नयस्व प्रापय ॥ ५२ ॥ मानत्यागे बाहुबलिदृष्टांतः ॥ इति सिंदुरप्रकराख्यस्य व्याख्यायां ह

संजीवनं विनयजीवित मंगभाजां ॥
जात्यादिमान विषजं विषमं विकारं ॥
तं मा र्द वामृतरसेन नयस्व शांतिं ॥ ५२ ॥

मानप्रक्रमः ४ ॥ ११

र्षकीर्त्तिभिःसूरिभि र्विहितायांतु मानस्य प्रक्रमो ऽजनि ॥ ४ ॥ ११ ४१

अथ मायात्याग माह कुशलेति ॥ भोभव्यजन मायां कपटं दूरतो मुंच त्यज ॥ क

थंभूतां मायां ॥ कुशलस्य क्षेमस्य जनने उत्पादने वंध्यां वंध्यास्त्रीरूपां ॥ ॥ पुनः सत्य मेव सूर्य स्तस्या अस्तमनाय संध्यां तां पुनः किं० कुगति रेव युवति स्तस्याः वरमाला तां पुनः किं ० मोह एव मातंग स्तस्य शाला बंधनस्थानं ॥ तां

कुशलजननवंध्यां सत्यसूर्यास्तसंध्यां
कुगतियुवतिमालां मोहमातंगशालां ॥
शमकमलहिमानीं दुर्यशोराजधानीं ॥
व्यसनशतसहायां दुरतो मुंच मायां । ५३

किंभूतां शम एव उपशम एव कमलानि तेषां हिमानी हिमसंहतिः ॥ तां पुनः किं ० दुर्यशसः अपकीर्तेः राजधानी ॥ निवासनगरी तां ॥ पुनः किं ० व्यस

ननां कष्टानां शतानि सहायो यस्याः सा ॥ तां ॥ ईदृशीं मायां दूरतो मुंच ५३
पुन राह विधाये ति ॥ ये जनाः विविधै र्नानाप्रकारै रुपायै र्मायां कपटं विधाय कृ
त्वा परस्या न्यजनस्य वंचनं आचरंति कुर्वंति ते जनाः महामोहसखाः महदज्ञानयु

विधाय मायां विविधै रुपायैः परस्य ये वंचन माचरंति
ते वंचयंति त्रिदिवापवर्ग सुखा न्महामोहसखाः स्व मेव ५४
माया मविश्वासविलासमंदिरं दुराशयो यः कुरुते धनाशया

क्ताः संतः त्रिदिवापवर्ग सुखात् देवलोकमोक्षसुखात् ॥ स्वय मेवा त्मान मेव वं
चयाति विप्रतारयंति ॥ ५४ पुन र्मायादोष माह यो दुराशयो दुष्टचित्तो जनो
धनाशया ॥ द्रव्यस्य वांछया ॥ लोभे न मायां कपटं कुरुते विदधाति ॥ स जनः

४२

आत्मनो ऽनर्थसार्थं कष्टासमूहं पतंतं आगच्छंतं ने क्षते ना लोकयते ॥ कथं यथा
विडालो मार्ज्जारः पयो दुग्धं पिवन् सन् लकुटं दंडप्रहारं ने क्षते ना लोकयते ॥
कथंभूतां मायां ॥ अ विश्वासस्य ॥ अ प्रतीतेः क्रीडागृहं ॥ मंदिरशब्दस्या जहल्लिं
गत्वं ॥ ५५ ॥ पुन राह ॥ मुग्धप्रता ० कपटे मायायां लंपटा वांछायुक्ता चित्त

सोनर्थसार्थं न पतंत मीक्षते यथा विडालो लकुटं पयःपिवन् ५५
मुग्धप्रतारणपरायण मुज्जिहीते य त्पाटवं कपटलंपटचित्तवृत्तेः

वृत्ति र्मनोव्यापारो यस्य तस्य पुरुषस्य यत्पाटवं ॥ चातुर्यं उज्जिहीते उल्लसंति ॥
त त्पाटवं अवश्यं निश्चयेन आयतौ आगामिनि काले उपप्लवं ॥ उपद्रवं शकृत्वा
अविशाय न जीर्यति न परिणामं याति ॥ किं कुतःतस्य विपाको भव त्येव ॥
किं मिव अपथ्यभोजनं आमय मिव ॥ यथा अपथ्यं भोजनं जेमनं ॥ आमयं रोगं

अकृत्वा आयतौ न जीर्यति कथंभूतं पाटवं मुग्धानां मूर्खानां प्रतारणे वंचने पराय णं तत्परं ॥ ५६ ॥ अत्र मल्लीनाथजीवमहबलदृष्टांत : ॥ १ ॥ अषाडभूतिऋषी दृष्टांत ॥ २ ॥ इतिश्री सिंदूरप्रकराख्यस्या व्याख्यायां हर्षकीर्त्तिभिः सूरिभि र्वि हितायां तु मायाया : प्रक्रमो ऽजनि ४ १२

जीर्यं त्युपप्लवमवश्यमि हाप्य कृत्वा ॥
ना पघ्पभोजन मिवा मय मायतौ तत् ॥ ५६
मायाप्रक्रमः ॥ ५६ ॥ ४ ॥ १२ ॥

अथ लोभत्यागोपदेश माहः ॥ यद्दुर्गा मिति धनेन वित्तेनां धिता अंधप्रायकृता ॥ धी बुद्धि र्येषां ते ॥ ईदृशाः पुरुषाः ॥ यत् दुर्गां विषमां अटवीं अरण्यं अटंति ४३

चाम्यंते ॥ पुन र्यत् विकटं विस्तीर्णं देशांतरं क्रामंति ॥ भ्रमंति ॥ पुन र्यत् ग हनं दुरवगाहंगाहं ते उल्लंघयंति ॥ पुन र्यत् अतनुक्लेशां बहुकष्टसाध्यां ॥ कृषि क र्षणं क्षेत्रादि कुर्व्वते विदधते ॥ पुन र्यत् कृपणं अदातारं पतिं स्वामिनं सेवंते पुन

य दुर्गा मटवी मटंति विकटं क्रामंति देशांतरं ॥
गाहंते गहनं समुद्र मतनुक्लेशां कृषिं कुर्व्वते॥
सेवंते कृपणं पतिं गजघटासंघटदुःसंचरं ॥

र्यत् गजघटानां हस्तीसमूहानां संघेन दुःसंचरं गंतु मशक्यं ॥ प्रधनं युद्धं प्रति स र्पंति गच्छंति तत् सर्व्वं लोभस्य विस्फुर्जितं ॥ लोभस्य चेष्टितं जानिहि ॥ लोभ शा देतानि वस्तुनि कुर्व्वंति ॥ अतःकारणा ल्लोभ सत्याज्य एव ॥ ५७ ॥ पुन

राह मूल मिति ॥ भो भव्या लोभः पराभूयतां निराक्रियतां यज्यतां मोह एव अ
ज्ञान मेव विषद्रूमो विषतरुः तस्य मूलं जटा रूपं मूलशब्दस्या ज्जहल्लिंगत्वं ॥ पुनः
कथंभूतो लोभः सुकृत मेव पुण्य मेवां भोराशिः समुद्र स्तस्य शोषणे कुंभोद्भवो ‌अग

सर्प्पति प्रधनं धनांधितधिय स्तल्लोभविस्फूर्जितं ॥ ५७ ॥
मूलं मोहविषद्रुमस्य सुकृतांभोराशिकुंभोद्भवः ॥
क्रोधाग्ने ररणिः प्रतापतरणि प्रछादने तोयदः ॥

स्ति रिव पुनः क्रोधाग्नेः अरणिः क्रोध एव अग्नि स्तस्य अरणी काष्टं उत्पत्तिस्थानं
पुनः प्रताप एव तरणिः सूर्य स्तस्या छादने तोयदो मेघो ऽभ्रं ॥ पुनः कले कलह ४४
स्य क्रीडासद्म लीलागृहं पुनः विवेक एव पुन्यापुन्यविचार एव शशी चंद्र स्तस्य

स्वर्भाणुः राहुः पुनः आपन्नदीसिंधुः आपदंकष्टा न्येव नद्य स्तासां सिंधुः समुद्र
स्तासां स्थानरूपत्वात् ॥ पुनः किं ० कीर्त्ति रेव लता वल्ली तस्या कलापः समूह
स्तस्य विनाशे कलभो हस्तिशावः ईदृशो लोभो जीर्यतां ॥ ५८ ॥ पुन राह ॥

क्रीडासद्म कले विवेकशशिनः स्वर्भाणु रापन्नदीसिंधुः
कीर्त्तिलताकलापकलभोः लोभः पराभूयतां ॥ ५८
निःशेषधर्मवनदाहविजृंभमाणे ॥

निःशेषेति ॥ लोभ एवा नलो ऽग्नि स्तस्मिन् लोभानले गुणौघो ज्ञानादिगुणानां
ओघः समूहः शलभतां पतंगत्वं लभते ॥ पतंगवज्ज्वलति ॥ कथंभूते लोभानले
निःशेषं समस्तं यद्धर्म एव वनं तस्या दाहेन विजृंभमाणः ॥ विस्तारं प्राप्नुवन् ॥

तस्मिन् पुनः कथंभूते दुःखानां ओघः समूह एव भस्म रक्षा यत्र स ॥ तस्मिन् पुनः क ० विसर्प्पत् प्रसरत् अपकीर्त्ति रेव धुमो यस्मात् सः ॥ तस्मिन् ॥ पुनः क ० बाढं अतिशयेन धना न्येव द्रव्या ण्येव इंधनानि एधांसि तेषां समागमेन आगम

दुःखौघभस्मनि विसर्प दकीर्त्तिधूमे ॥
बाढं धनेंधनसमागमदीप्यमाने ॥
लोभानले शलभतां लभते गुणौघः ॥ ५९ ॥
जातः कल्पतरुः पुरः सुरगवी तेषां प्रविष्टागृहं

नेन दीप्यमानो ॥ अयंतं प्रज्वलत् वृद्धि प्राप्नुवत् तस्मिन् सर्वेगुणा पतंगवत् भवंति ५९ ॥ संतोषेण लोभो निवार्यः स्या दतः संतोषगुणं नाह ॥ जात इति ॥ ये 45

जना संतोषं तृष्णानिरोधं बिभ्रते धरंति तेषां पुरो अग्रे कल्पतरु कल्पवृक्षो जातः प्रत्यक्षो अभूत् ॥ पुन स्तेषां गृहं सुरगवी कामधेनुः प्रविष्टा आगता ॥ पुन स्तेषां करतले चिंतामणि रत्नं उपस्थितं आगतं पुन स्तेषां निधानं द्रव्यस्यनिधिः संनि

चिंतारत्न मुपस्थितं करतले प्राप्तो निधिः संनिधिं
विश्वं वश्य मवश्य मेव सुलभाः स्वर्गापवर्गश्रियो
ये संतोष मशेष दोषदहनध्वंसांबुदं बिभ्रते ६०

लोभप्रक्रमः ॥ ४ ॥१३॥

धि समीपं प्राप्तः पुनः विश्वं जगत् अवश्यं निश्चितं तेषां वश्यं जातं पुन स्तेषां स्वर्गापवर्गश्रियः देवलोकमोक्षसंपदः सुलभाः सुप्राप्याः स्युः अतः संतोष एव कर्त्तव्यः

६० ॥ अत्र सुभूमचक्रवर्त्तिकथा ॥ सिंदुरप्रकराख्यस्य व्याख्यायां ॥ हर्षकीर्त्तिभिः विहितायां तु लोभस्य प्रक्रमो ऽजनि लोभप्रस्तावः ॥ ४ ॥ १३ ॥ अथ सौ जन्यविधानोपदेश माह ॥ वरं इति ॥ कुपितस्य फणिन क्रुद्धस्य सर्प्पस्य वक्रकुहरे

वरं क्षिप्तः पाणिः कुपितफणिनो वक्रकुहरे ॥
वरं झंपापातो ज्वलदनलकुंडे विरचितः
वरं प्राशप्रांतः सपदि जठरांत र्विनिहितो

मुखविवरे ॥ पाणि र्हस्तः क्षिप्तो निक्षिप्तः सन् ॥ वरं श्रेयान् ॥ पुन र्ज्वलदनल कुंडे प्रज्वलत् अग्निकुंडे झंपापातो विरचितः कृतो वरं श्रेष्टः ॥ पुनः प्रासस्य कुंत स्य प्रांतो अग्रं जठरांतः उदरमध्ये क्षिप्तो वरं श्रेष्टः ॥ तदपि विदुषा पंडितेन दौ ४६

र्जन्यं पैशून्यं न जन्यं न कर्त्तव्य मेव ॥ किंभूतं दौर्जन्यं विपदां आपदां कष्टानां सद्म ग्रहं स्थान मित्यर्थः अतःकारणात् सौजन्य मेव विधेयं ॥ ६१ ॥ पुन राह ॥ सौजन्य मेव सुजनते व पुंसां यशश्चयं कीर्त्तिसमूहं विदधाति करोति पुनः स्वःश्रेय

न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषा ६१
सौजन्य मेव विदधाति यशश्चयं
च स्वःश्रेयसं च विभवं च भवक्षयं च
दौर्जन्य मावहसि यं कुमते तदर्थं

सं कल्याणं विदधाति पुन र्विभवं द्रव्यं विदधाति ॥ पुन र्भवक्षयं संसारक्षयं मोक्षं विदधाति ॥ ततो हेकुमते हेकुबुद्धे यत् तदर्थं यशश्चयाद्यर्थं दौर्जन्यं पिशुनतां

आवहासि धरासि तत् ॥ धान्ये धान्यक्षेत्रे दवं दावाग्निं दिशासि ददासि ॥ कथंभूते धान्ये जलसेकसाध्ये जलस्य सेकेन सिंचनेन साध्ये निःपादनीये ॥ तत्र दवं ददासि ६२ ॥ दारिद्रे पि सुजनतै व श्रेष्टे त्याह ॥ वर मिति ॥ सुजनभावभाजां सौजन्य

धान्ये नलं दिशसि तज्जलसेकसाध्ये ६२
वरं विभववंध्याता सुजनभावभाजां नृणा
मसाधुचरितात्मनां न पुन रुर्ज्जिताः

सहितानां नृणां पुंसां विभवस्य वंध्यता निःफलता निर्द्रव्यता दारिद्रं मेव वरं श्रेष्टं असाधुचरितेना अर्ज्जिताः ॥ दौर्ज्जन्येन उपार्ज्जिताः संपदः श्रियो पि वरं न श्रेष्टा न ॥ श्लाघ्या न ॥ कथंभूताः संपद उर्ज्जिता ः बलिष्टा: प्रचुराः ॥ तत्रं दृ ४७

ष्टांत माह ॥ सहजं स्वाभाविकं कृशत्वं दौर्बल्य मपि शोभते ॥ तु पुनः स्वयथुसंभवा शोफाज्जाता स्थुलता पी नता पि न वरं न श्रेष्टा ॥ कथंभूतं कृशत्वं ॥ आयतौ उत्तरकालि आगामिकाले सुंदरं शोभनं ॥ कथंभूता स्थुलता ॥ विपाके परिणामे

संपदः कृशत्वम पि शोभते सहज मायतौ
सुंदरं विपाकविरसा न तु स्वयथुसंभवा स्थूलता ६३
न ब्रूते परदूषणं परगुणं वक्तय ल्प मप्य न्वहं

अंत्ये विरसा दारुणा ॥ ६३ ॥ सौजन्यभाजां गुणा नाह नब्रूते इति ॥ सतां साधुनां सज्जनानां एत चरित्रं चेष्टितं अस्ति एत दिति किं ॥ सज्जनः परदूषणं परदोषंन ब्रूते ॥ पुन रल्य मपि तुछ मपि ॥ परगुणं अन्यगुणं अन्वहं निरंतरं

वक्ति कथयति ॥ पुनः परेषां ऋद्धिषु संपत्तु ॥ संतोषं अनभिलाषं अमत्सरं वहत्ते धत्ते ॥ पुनः परबाधासु परपीडासु ॥ शुचं शोकं धत्ते पुनः स्वश्लाघां आत्मप्रशंसां नकरोति पुन नयं न्यायं नोझ्झ ति नत्यजाति ॥ पुन रौचित्यं योग्यतां नो लंघय

संतोषं वहते परर्द्धिषु पराबाधासु धत्ते शुचं ॥
स्वश्लाघां न करोति नो झति नयं नौ चित्य मुलंघय ॥
त्युक्तो प्य प्रिय मक्षमां न रचयत्ये त च्चरित्रं सतां ६४
स्वजनप्रक्रमः ॥४ ॥१४ ॥

ति ॥ नातिक्रामति ॥ पुन रप्रियं विरूपं अहितं उक्तो पि भाषितो पि ॥ अक्षमां क्रोधं न रचयति ॥ सतां एत च्चरित्रं वर्त्तते ॥ ६४ ॥ सिंदुरप्रकरग्रथव्या 48

ख्यायां ॥ हर्षकीर्त्तिभिः सूरिभि र्विहितायां तु सौजन्य प्रक्रमो ऽजनि ॥ ४ ॥ १४
अथ गुणिसंगं वर्णयति ॥ धर्म्मं मिति ॥ यो विमतिः निर्बुद्धिः गुणिनां गुणवतां मनुष्यणां संगं संसर्गं विमुच्य त्यक्त्वा ॥ कल्याणं श्रेय आकांक्षति असौ विमतिः ॥

धर्म्मं ध्वस्तदयो यश श्च्युतनयो वित्तं प्रमत्तः पुमान् ॥
काव्यं निःप्रतिभ स्तपः शमदयाशून्यो ऽल्पमेधा श्रुतं ॥
वस्त्वालोक मलोचन श्चलमना ध्यानं च वांछत्य सौ ॥

पुमान् ध्वस्तदयो गत कृपः निर्दयः सन् ॥ धर्म्मं पुन्यं वांछति ॥ पुन श्च्युतनयो गतः न्यायः ॥ अन्यायभाक् सन् ॥ यशः कीर्तिं वांछति पुनः प्रमत्तः प्रमादि सन् ॥ वित्तं धनं वांछति पुन निःप्रज्ञः प्रज्ञारहितः सन् काव्यं कर्तुं वांछति ॥ पुनः

शमेन उपशमेन दयया च हिनो रहितः ॥ पुमान् तपो वांछति ॥ पुन रल्पमेधा स्तुछबुद्धिः ॥ बुद्धिरहितः सन् ॥ श्रुतं शास्त्रं पठितुं वांछती ॥ पुन रलोचनो नेत्र रहितः सन्॥वस्तुनां घटपटादिनां विलोकनं दर्शनं वांछति पुन श्चलमना चलाच्चित्तः

यः संगं गुणिनां विमुच्य विमतिः कल्याण माकांक्षति ६५
हरति कुमतिं भिंत्ते मोहं करोति विवेकितां ॥
वितरति रतिं सूते नीतिं तनोति गुणावलिं ॥

४९

सन् ध्यानं वांछति ॥ तथा गुणवता संगं विना कल्याणं न ॥ ६५ ॥ पुन गुंणि संगं वर्णयति ॥ हरती ति ॥ नृणां पुंसां गुणैः उत्तमाः गुणोत्तमा स्तेषां संगमो नृणां किं किं अभीष्टं वांछितं न जनयति न करोति ॥ अपितु सर्व्वं मपीष्टं जन

यति ॥ गुणोत्तमसंगमः ॥ कुमतिं कुबुद्धि हरति दूरिकरोति ॥ पुन मोहं अज्ञानं भिंते विदारयति ॥ पुन विवेकितां तत्वातत्वविज्ञत्वं करोति रतिं संतोषं वितरति ददाति ॥ पुन नीतिं न्यायं सूते जनयति ॥ पुनः गुणावलिं गुणश्रेणीं तनोति पा

प्रथयति यशो धत्ते धर्म्मं व्यपोहति दुर्गतिं ॥
जनयति नृणां किं ना भीष्टं गुणोत्तमसंगमः ६६
लब्धुं बुद्धिकलापमापद मपाकर्तुं विहर्तुं पथि॥

ठांतरे तु विनीततां तनोति पुन यशः कीर्तिं प्रथयति विस्तारयति ॥ पुन धर्म्मं धत्ते धरति ॥ पुन र्दुर्गतिं नरकतिर्यग्गतिरूपांव्यपोहति ॥ विस्फोटयति ॥ एवं गुणोत्तमसंगमः सर्व्वं मभिष्टं जनयति ॥ ६६ ॥ पुन राह लब्धुं बुद्धि ० रे चित्त

चे यदि त्वं बुद्धिकलापं बुद्धिसमूहं लब्धुं प्राप्तुं समीहसे वांछसि ॥ त त्तदा गुणव
तां गुणिनां संगं संसर्गं ॥ अंगीकुरु विधेहि ॥ पुन र्यदि विपदं आपदं अपाकर्तुं
दूरिकर्त्तुं समीहसे ॥ पुन र्यदि पथि न्यायमार्गे विहर्तुं विचरितुं वांछसि ॥ पुनः

प्राप्तुं कीर्ति मसाधुतां विधुवितुं धर्मं समासेवितुं ॥
रोद्धुं पापविपाक माकलयितुं स्वर्गापवर्गश्रियं ।
चे त्वं चित्त समीहसे गुणवतां संगं तदं गीकुरु ६७

कीर्तिं प्राप्तुं वांछसि पुन रसाधुतां असौजन्यं विधुवितुं स्फोटयितुं ॥ समीहसे ॥
पुन र्यदि धर्मं पुण्यं समासेवितुं कर्तुं समीहसे ॥ पुन र्यदि पाप विपाकं अशुभक ५०
मफलं रोद्धुं समीहसे पुनः स्वर्गापवर्गश्रीयं देवलोकमोक्षलक्ष्मीं आकलयितुं अनुभ

वितुं समीहसे ॥ तदा गुणवतां संगं कुरु ॥ ६७ ॥ निर्गुणसंगमदोष माह ॥ ह
मतीति ॥ स निर्गुणसंगमः ॥ किं मपि श्रेयः ॥ कल्याणं अभिलषता वांछता पु
रुषेण कथं श्रेयः कथं आश्रयणीयः स कः यो महिमा एव महत्व मेवां भोजं क

हिमति महिमांभोजे चंडानिलत्यु दयांबुदे ॥
द्विरदति दयारामे क्षेमक्षमाभृति वज्रति ॥
समिंधति कुमत्यग्नौ कंदत्य नितिलतासु यः

मलं तस्मिन् हिमति ॥ हिम इवा चरति ॥ तद्विनाशकत्वात् पुन र्यो निर्गुण सं
गः ॥ उदय एव धन धान्य प्रताप वृद्धि रेवां भोदो मेघ स्तत्र चंडानिलति ॥
प्रचंडवायु रिवा चरति ॥ पुन र्दया एव आरामो वनं ॥ तत्र द्विरदति द्विरदवद्

गजवदा चरति ॥ तद्दु न्मूलकत्वात् ॥ पुन र्यः क्षेम मेव कुशल मेव क्षमाभृत् गिरि स्तत्र वज्रति वज्रव दाचरति ॥ तच्छेदकत्वात् ॥ पुन र्यः कुमति रेवा ग्नि स्तत्र समिधाति ॥ समित् इंधन इवा चरति ॥ तद्वृद्धिहेतुत्वात् पुन र्य अनीतिलता

कि मभिलषता श्रेयः श्रेयः स निर्गुणसंगमः ६८
गुणिसंगप्रक्रम ४ ॥ १५
आत्मनं कुपथेन निर्गमयितुं यः शूकला श्वायते ॥

सु ॥ अन्यायवल्लिषु कंदति कंद इवा चरति ॥ त न्मूलभूतत्वात् ईदृशो निर्गुण संगमः ॥ श्रेयो वांछता पुरुषेण न श्रेयः ना श्रयणीयः ॥ ६८ ॥ अत्र गिरिशुक पुष्प शुकयोः कथा; ॥ यत : ॥ माता प्ये का पिता प्ये को मम तस्य च प ५२

क्षिणः ॥ अहं मुनिभि रानीत सर्वा नीतो गवशिभिः ॥ १ ॥ गवाशिनां तु स वचः शृणोति ॥ अहं तु राजन् मुंनिपुंगवानां ॥ प्रत्यक्ष मेत द्भवता पि दृष्टं संसर्गजा दोषगुणा भवंति ॥ २ ॥ इति वचनात् ॥ सिंदूरप्रकर ग्रंथव्याख्यायां ॥ हर्ष कीर्तिभीः सूरिभि र्विहितायां तु ॥ गुणिसंगम प्रक्रमो ऽजनि ॥ ४ ॥ १९

कृत्याकृत्यविवेकजीवितहर्ता यःकृष्नसर्पायते ॥
यः पुण्यद्रुमखंडखंडनविधौ स्फूर्जत्कुठारायते

अथें द्रियजयो पदेश माह ॥ आत्मान मिति हे साधो तं इंद्रियगणं पंचेंद्रिसमूहं जित्वा विनिर्जित्य शुभंयुः शुभसंयुक्तो भव ॥ तं कं यः इंद्रियगण : स्पर्शन रसन घ्रान चक्षु श्रोत्रसमूहः आत्मानं स्वं कुपथेन कुमार्गेण निर्गमयितुं नेतुं शूकला श्वायते दुर्वि नीत अश्व इवा चरति ॥ तस्य कुमार्गगामीस्वभावत्वात् ॥ पुन र्यः इं

द्रियगण: कृत्यं च अकृत्यं च कृत्या कृत्ये तयो र्विवेक एव विचार एव जीवितं जीवितव्यं ॥ तस्य हृतौ हरणे कृष्णसर्प्पायते कृष्णसर्प्प इवा चराति ॥ पुन र्यः इंद्रियगणः पुण्य मेव द्रुम स्तेषां खंडं वनं तस्य खंडनविधौ छेदने स्फूर्ज्जत्कुठारायते

तं लुप्तव्रतमुद्र मिंद्रियगणं जित्वा शुभंयु र्भव ६९

प्रतिष्ठां यन्निष्ठां नयाति नयनिष्ठां विघटय ॥

त्यकृत्ये ष्वाधत्ते मति मतपसि प्रेमतनुते

कुठार इवा चराति कथंभूतं इंद्रियगणं लुप्तव्रत मुद्रं लुप्ता छिन्ना व्रतानां मुद्रा मर्यादा येन स ० तं ० ॥ ६९ पुन राह ॥ प्रतिष्टा मिति ॥ भो भव्य तत्करणानां ५२

इंद्रियाणां निकुरंबं समूहं वशे कुरु ॥ वश्यतां नय ॥ आत्मायत्तं विधेहि ॥ तत्किं यत् करणनिकुरंबं प्रतिष्टां महत्व निष्टां अवसानक्षयं नयति प्रापयति पुन र्यत् नयनिष्टां ॥ न्यायस्थितिं विघटयति ॥ स्फोटयति पुन र्यत् अकृत्येषु ऽनाचारेषु मतिं बुद्धिं आधत्ते स्थापयाति पुनः अतपसि अविरतौ प्रेम तनुते स्नेहं कु

विवेकस्यो त्सेकं विदलयाति दत्ते च विपदं

पदं त दोषाणां करणनि कुरुंबं कुरुवशे ७०

धत्तां मौन मगारमुझतु विधिप्रागल्भ्य मभ्यस्यता ॥

रुते पुन र्यत् विवेकस्य कृत्या ऽकृत्य विचारस्य उत्सेकं उन्नतत्वं विदलयति विध्वंसयति पुन र्यत् विपदं आपदं कष्टं दत्ते तत् करणनिकुरंबं इंद्रियसमूहं स्ववशे

कुरु कथंभूतं दोषाणां पदं स्थानं ७० धत्ता मिति हेसाधो भवान् मौनं धत्तां कुरु तां पुनः आगारं गृहं उझतु त्यजतु पुन विधिप्रागल्भ्यं सर्व्वाचारचातुर्यं अभ्यस्य तां कुर्व्वंतु अंतर्गणं गछवासमध्ये अथवा अंतर्व्वणं वनमध्ये अस्त भवतु पुन राग

म स्त्वं तर्गण मागमश्रम मुपादत्तां तप स्तप्यतां
श्रेयः पुंजनिकुंजभंजनमहावातं न चे दिंद्रिय
व्रातं जेतु मवैति भस्मनि हुतं जानीत सर्व्वं ततः ७१

मश्रमं सिद्धांतपठनं उपादत्तां अंगीकुरुतां पुन स्तप स्तप्यतां करोतु परं चेद्यदि इंद्रियव्रातं इंद्रियसमूहं जेतुं वशीकर्तुं नावैति न जानाति तदा सर्व्वं पुर्व्वानुष्टा नं भस्मनि रक्षायां हुतं वृथा जानीत कथंभूतं इंद्रियव्रातं श्रेयसां कल्याणानां पुं ५३

ज एव निकुंजं तस्य भंजने महावातं वातं वा तूलसमानं ७१ पुन विशेष माह धर्म्मध्वंसे ति अक्षाणां इंद्रियाणां ओघ समूहं अनयन् अ वशीकुर्व्वन् जनः अ क्षेमभाक् अ कल्याणभाक् भवति कथंभूतं अक्षौघं धर्मध्वंसे धुरीणः मुख्यं स्तं पुन अ

धर्म्मध्वंसधुरीण मभ्रमरसावारीण मापत्प्रथा
लंकर्म्मीण मशर्मनिर्मितिकलापारीणमे कांततः
सर्वान्नीन मनात्मनीन मनयात्यंतीन मिष्टे यथा ॥

भ्रमरसस्य सत्यज्ञानस्य आवारीणं आवर्णाय समर्थ आवारीण स्तं आछादकं पुनः कथं प आपदां कष्टानां प्रथायां विस्तारणे अलंकर्म्मीणः कर्म क्षय स्तं पुनः किं प अ शर्मणां अ कल्याणानां दुःखानां निर्मितौ निर्माणे करणे कलापारीण

श्चतुर स्तं पुन किं ० एकांततो निश्चयेन सर्व्वान्नीनः सर्व्वान्नभक्षक स्तं पुनः किं० न आत्मने हितो ऽनात्मनीनः तं ॥ आत्मनो ऽहितं पुनः किं ० अनया अन्याये ऽयंतीनो ऽयंतगामी तं ॥ पुनः किं ० इष्टे इष्टवस्तुनि यथाकामं स्वेछया

कामीनं कुमताध्वनीन मजय न्नक्षौघ मक्षेमभाक् ७२

इंद्रियदमप्रक्रमः ॥ ४ ॥ १६

निम्नं गछति निम्नगे व नितरां निद्रे व विष्कंभते ॥

वर्त्तते ॥ इति यथाकामिन स्तं पुनः किं ० ॥ कुमते कुत्सितमते अध्वनीनः पांथ स्तं इदृशं इंद्रियसमूहं ॥ अ जयन् सन् ॥ अ क्षेमभाक् भवति ॥ ७२ यतः कुरंग मातंगपतंगभृंगाः मीना हताः पंचभि रेव पंच एकः ॥ प्रमादी स कथं न वध्यते ५४

यः सेवते पंचभि रेव पंच ॥ १ ॥ इतिसिंदूरप्रकरग्रंथस्य व्याख्यायां हर्षकीर्त्तिभिः सूरिभि विहितायां तु इंद्रियदमप्रक्रमो ऽजनि ॥ ४॥१६ ॥ लक्ष्मीस्वभाव माह ॥नि म्नगेति ० कमला लक्ष्मीः ॥ निम्नं नीचं प्रति गछति के व निम्नगा इव नदीव यथा नदी नीचं गछति ॥ पुनः नितरां अतिशेयन चैतन्यं ज्ञानं विष्कंभते विना

चैतन्यं मदिरे व पुष्याति मदं धूम्ये व दत्तें धतां ॥

चापल्यं चपले व चुंबति दवज्वाले व तृष्णां नयत्यु ॥

शयति के व ॥ निद्रे व यथा निद्रा अचैतन्यं करोति ॥ पुन लक्ष्मी मदं, अहंकारं पुष्यति पुष्णाति के व मदिरे व ॥ सूरे व ॥ यथा मदिरा मदं . उन्मत्ततां करोति पुनः कमला अंधत्तां दत्ते ॥ अंधत्वं करोति ॥ के व ॥ धूम्ये इव : धूमसमूह इव॥ यथा धूमो ऽध्यं करोति ॥ पुनः लक्ष्मी श्चापल्यं चुंबति भजति ॥ के व चपला

इव ॥ विद्यु दिव ॥ पुनः कमला तृष्णां उलासं नयति ॥ लोभवांछां वर्द्धयति ॥ के व दवज्वाला इव ॥ यथा दवज्वाला तृषां वर्द्धयति ॥ पुनः कमला स्वैरं स्वेछया परिभ्रमति के व कुलटांगना इव ॥ अ सती स्त्री इव ॥ यथा असती स्त्री स्वे छया भ्रमति तद्वत् ॥७३॥

ल्लासं कुलटांगने व कमला स्वैरं परिभ्राम्यति ॥ ७३

दायादा स्पृहयंति तस्करगणा मुष्णंति भूमिभुजो ॥

धनस्य दोषा नाह ॥ धनं द्रव्यं धिक् अस्तु धिक् निर्भत्सन निंदयोः ॥ किंभूतं व न्हधीनं बन्हत्वं ॥ बहव : इछंति कथं दायादाः ॥ गोत्रिणः स्पृहयंति ॥ ग्रहीतुं वांछंति ॥ पुन स्तस्करगणा श्चोरसमूहाः मुष्णंति चौरयंति पुन भूमीभुजो राजानः ५५

छलं आकालय्य मिषंदत्वा गृह्णंति ॥ हुतभुक् वन्हिः क्षणा द्वेगेन भस्मी करोति ज्वालयित्वा रक्षां करोति पुन रंभः पानीयं प्लावयति वाहयति ॥ पुन र्यद्धनं क्षितौ विनिहितं स्थापितं सन् यक्षा व्यंतरा हठा द्बलात्कारेण हरंते अपहरंति ॥

गृह्णंति छल माकलय्य हुतभुग्भस्मीकरोति क्षणात् ॥

अंभः प्लावयति क्षितौ विनिहितं यक्षा हरंति हठात् ॥

दुर्वृत्ता स्तनया नयंति निधनं धिग्बन्हधीनं धनं ७४

नीचस्या पि चिरं चटूनिरचयं त्यायांति नीचै र्नतिं ॥

पुन र्दुर्वृत्ताः दुराचारा स्तनयाः पुत्रा निधनं विनाशं नयंति प्रापयंति ॥ एवं वन्ह धीनं धनं धिग स्तु ॥ ७४ ॥ धने मोहोत्पादकत्व माह ॥ नीचस्ये ति ॥ मनस्वि

नो मानवंतो दक्षा अपि मनुष्या ॥ वित्तार्थिनो द्रव्यार्थिनः संतः किं कष्टं न कुर्व्वं
ति अपितु सर्वं कष्टं कुर्व्वंति ॥ यथा नीचस्या पि नरस्या ग्रे चिरं चिरकालं या
चन् चटूनि चाटूवचनानि ॥ प्रियवचनानि रचयंति जल्पंति ॥ पुन र्निचै नरैः

शत्रो रप्य गुणात्मनो पि विदधत्यु च्चै र्गुणो त्कीर्त्तनं ॥
निर्वेदं न विदंति किंचिद कृतज्ञस्या पि सेवाक्रमे ॥
कष्टं किं न मनस्विनो पि मनुजाः कुर्व्वंति वित्तार्थिनः ७५

समं नतिं आयांति प्रणामं कुर्व्वंति ॥ पुनः शत्रो रपि अगुणात्मनो निर्गुणस्या पि उ
च्चै रतिशयेन गुणोत्कीर्त्तनं गुणवर्णनं विदधाति॥ पुन रकृतज्ञस्या पि प्रभोः सेवाक्रमे
सेवा करणे किंचित् स्तोक मपि निर्वेदं खेदं न विदंति न जानंति वित्तवां छका ५६

संतः ॥ ७६ ॥ उपमानेन श्री स्वरूप माह ॥ लक्ष्मीः नीचं सर्प्पति नीचं जनं
प्रतियाति कस्मात् उत्प्रेक्षते र्णवपयः संगात् समुद्रजलसंगमा न्नीचगामि न्यभूत् पुन
र्लक्ष्मीः क्वापि पदं स्थानं न धत्ते न स्थापयति ॥ कीदृशी अंभोजिनी संसर्गात्

लक्ष्मीः सर्प्पति नीच मर्णवप यः संगा दिवांभोजनी ॥
संसर्गा दिव कंटकाकुलपदा न क्वापि धत्ते पदं ॥
चैतन्यं विषसन्निधे रिव नृणा मुज्जासय त्यंजसा ॥

कमलिनीसंयोगा दिव कंटकाकुलपदा कंटकै र्व्याप्तचरणे व पुन र्लक्ष्मी र्नृणां पुं
सां ॥ चैतन्यं ज्ञानं अंजसा वेगेनो ज्जासयति गमयति ॥ कस्मात् विषसंन्निधे र्वि
षसामीप्या दिव लक्ष्म्याः विषस्य च समुद्र स्थानत्वात् तस्मा त्कारणात् गुणिभि र्नं

नै धर्मस्थाननियोजनेन धर्मस्थानव्ययकरणेना स्याः लक्ष्म्याः फलं ग्राह्यं सफला क
र्त्तव्ये त्य र्थः ॥७६ ॥ सिंदूरप्रकरग्रंथ व्याख्यायां ॥ हर्षकीर्त्तिभिः सूरिभि र्विहिता
यां तु लक्ष्म्या श्च प्रक्रमो ऽजनि ॥ ४ ॥ १७ ॥ दानोपदेश माह ॥ चारित्र मि

धर्मस्थाननियोजनेन गुणिभि र्ग्राह्यं तद स्याः फलं ७६
लक्ष्म्याःस्वभाप्रक्रम ४ ॥ १७
चारित्रं चिनुते धिनोति विनयं ज्ञानं नयत्यु न्नतिं ॥

ति पवित्रं न्यायोपार्जितं धनं वित्तं ॥ पात्रे सुपात्रे ॥ निहितं दत्त सत् चारीत्रं
संयमं चिनुते वर्द्धयति ॥ विनयं विनयगुणं धिनोति ॥ प्रीणयति ॥ पुन ज्ञानं ८७
श्रुतादि ॥ उन्नतिं नयति प्रापयति पुनः प्रशमं उपशमं पुष्नाति पोषयति पुन

स्तपो मासक्षपणादि प्रबलयति ॥ पारणादियोगा दुत्साहयति पुन रागमं सिद्धांत
पठनादि उल्लासयति प्रबलं करोति ॥ पुनः सत्कर्मवनं कंदलयति कंदलायुक्तं क
रोति ॥ पुनः अघं पापं दलयति खंडयति पुनः स्वर्गं ददाति ॥ क्रमात् अनुक्र

पुष्नाति प्रशमं तपः प्रबलय त्युल्लासय त्यागमं ॥
पुण्यं कंदलय त्यऽघं दलयति स्वर्गं ददाति क्रमात् ॥
निर्वाणश्रिय मातनोति निहितं पात्रे पवित्रं धनं ७७
दारिद्र्यं न त मीक्षते न भजते दौर्भाग्य मालंबते ॥

मेण निर्वाणश्रियं मोक्षलक्ष्मीं आतनोति दत्ते इत्य र्थः सुपात्रे दत्तं धनं ॥ एता
नि वस्तुनि करोति ॥ ७७ ॥ दारिद्र्यं नेति ० यः पुमान् पात्रे सुपात्रे दानं वित

राति प्रयच्छति तं पुरुषं दारिद्रं न ईक्षते न पश्यति ॥ पुन स्तं दौर्भाग्यं दुर्भग त्वं न भजते न सेवते ॥ पुन स्तं अकीर्ति रपयश स्तं ना लंबते ना श्रयति पुन स्तं पराभवः परिभवनं ना भिलषते ॥ न वांछति ॥ पुन र्व्याधि मांद्यं तं नास्कं

ना कीर्ति नैपराभवो भिलषते न व्याधि रास्कंदति ॥
दैन्यं नाद्रियते दुनोति न दरः क्लिश्नंति नै वा पदः ॥
पात्रे यो वितर त्यनर्थदलनं दानं निदानं श्रियः ७८

दति न शोषयति पुन दैन्यं दीनता नाद्रियते ॥ ना श्रयति ॥ पुन र्दरोभयं न दुनोति ॥ न पीडयति ॥ पुनः आपदो व्यसनानि कष्टानि ॥ तं न क्लिश्नांति न पीडयंति ॥ यः पात्रे दानं ददाति किंभूतं दानं अनर्थानां उपद्रवानां दलनं ५८

छेदनं ॥ पुनः किंभूतं श्रियां संपदां निदानं कारणं ॥ ७८ ॥ दानगुणा नाह लक्ष्मी रिति ॥ यः पुमान् पुण्यार्थं श्रेयोर्थं ॥ निजं अर्थं स्वकीयं धनं प्रयच्छति द दाति ॥ तं पुरुषं लक्ष्मीः कमला कामयते वांछति पुन मंतिः बुद्धि स्तं मृगयते

लक्ष्मीः कामयते मति र्मृगयते कीर्तिस्त मालोकते ॥
प्रीति श्चुंबति सेवते सुभगता निरोगता लिंगति ॥
श्रेयःसंहति रभ्युपैति वृणुते स्वर्गोपभोगस्थिति

अन्वेष्यति ॥ पुनः कीर्त्ति स्तं आलोकते पश्यति ॥ प्रीति रानंद स्तं चुंबति श्लि ष्यति ॥ पुनः सुभगता सौभाग्यं तं सेवते भजति ॥ निरोगता आरोग्यं तं आलिं गति ॥ पुनःश्रेयः संहतिः कल्याणपरंपरातं ॥ अभ्युपैति सन्मुख मायाति ॥ पुनः स्व

गोपभोगस्थिति देवलोकस्य भोगपद्धति स्तं वृणुते वरयाति ॥ पुन मुंक्ति मोक्ष स्तं वांछाते॥ यः पुण्यार्थं निजं अर्थं प्रयच्छति ॥ ७९ ॥ भूयो प्या ह ॥ तस्ये ति ० यः पुमान् निजं स्वकीयं विपुलं प्रचुरं ॥ वित्त मेव बीजं ॥ सप्तक्षेत्र्यां जिनभुवन

मुंक्ति वांछति यः प्रयच्छति पुमान् पुण्यार्थ मर्थं निजं ७९
तस्या सन्ना रति रनुचरि कीर्त्ति रुत्कं ठता
श्रीःस्निग्धाबुद्धिः परिचयपरा चक्रवर्तित्वऋाधिः

१ ॥ बिंब २ पुस्तक ३ ॥ चतुर्विधसंधभक्ति ॥ ७ ॥ रूपायां वपति ॥ तस्य पुरुषस्य रातिः समाधि रासन्ना समीपवर्त्तिनी स्या त्तथा तस्य कीर्ति रनुचरी सेविकास्य तथा ॥ तस्य श्री संपत् धनधान्यहिरण्यरुपा ॥ उत्कंठिता मिलनायो त्कांठि ५९

ता स्या त्तथा ॥ तस्य बुद्धि रौत्पत्ति क्याद्या स्निग्धा स्नेहवती स्या त्तथा ॥ तस्या चक्रवर्त्तित्वऋद्धि : सार्व्वभौमविभूतिः परिचयपरा सुपरिचिता स्या त्तथा ॥ त्रिदिवस्य स्वर्गस्य कमला श्रीः पाणौ हस्ते प्राप्ता संगता स्या त्तथा ॥ मुक्ति संपत्

पाणौ प्राप्ता त्रिदिवकमला कामुकी मुक्तिसंप ॥
त्सप्तक्षेत्र्यां वपति विपुलं वित्तबीजं निजं यः ८०
दानप्रक्रमः ४ ॥ १८

सिद्धि रमौका मुकी साभिलाषा स्या दः सप्तक्षेत्र्यां निजं वपति ॥ ८० ॥ अत्र धनासालिभद्र ॥ चंदनबाला सागरचंद्रश्रेष्टिकथाः सिंदूरप्रकराख्यग्रंथ व्याख्यायां हर्षकीर्त्तिभिः सूरिभि विंहितायां तु दानस्य प्रक्रमो ऽजनि ४ १८ अथ तपसः उपदे

शद्वार माह यदि ति वीता गता स्पृहा वांछा यस्य स वीत स्पृह : सन् वांछा नि दानादि रहितः सन् त द्विविधं तपःकुर्व्वीत कुर्यात् तत्किं य त्तपः पूर्वे भवे अर्जिता नि उपार्जितानि यानि कर्माणि ता न्येव शैलाः पर्व्वता स्तेषु कुलिशं वज्रं ते षां छेदकत्वात् पुन र्यं त्तपः काम एव दावानलो दवाग्नि स्तस्य ज्वालानां जालः

य त्पूर्वार्जितकर्मशैलकुलिशं य त्कामदावानल
ज्वालाजालजलं य दुग्रकरणग्रामाहिमंत्राक्षरं

समूह स्तत्र जलं त द्विनाशकत्वात् पुन र्यं त्तपः उग्रो दारूणो यः करणानां इंद्रि याणां ग्रामः समूहः स एवा हिः सर्प्प स्तस्य मंत्राक्षरं सर्प्प मंत्रस्य बीजं पु न र्यं त्तपः प्रत्युहा एव विघ्ना एव तमसो अंधकारस्य समूहस्य तत्र दिवसं दिनं ६०

तन्नाशकत्वात् ॥ पुन र्यं त्तपोलब्धि लक्ष्मी संप देव लता वल्ली तस्या मूलं उ त्पादनकंदं तद्वि विधं ननाप्रकारं तपः कुर्वंति ॥ ८१ तपः प्रभाव माह ॥ यस्मा दिति ॥ त त्तपः किं श्लाघ्यं न प्रशस्यं न ॥ अपितु श्लाघ्य मेव ॥ त त्किं॥ य

य त्प्रत्यूहतमः समूहदिवसं य ल्लब्धिलक्ष्मीलता ॥
मूलं त द्विविधं यथा विधितपः कुर्वीत वीतस्पृहः ८१
यस्मा द्विघ्नपरंपरा विघटते दास्यं सुराः कुर्व्वते ॥

स्मा त्तपसो विघ्नपरंपरा ॥ कष्टश्रेणि विघटते विलयं याति ॥ पुनः सुरा देवा दास्यं दासत्वं कुर्व्वते ॥ पुन र्यस्मा त्कामः शाम्यति उपशमं याति ॥ पुनः इंद्रिय गणः पंचेंद्रियसमूहो दाम्यति ॥दमं प्राप्नोति ॥ पुन र्यस्मा त्तपसः ॥ कल्याणं श्रे

य उत्सर्प्पति ॥ प्रसरति ॥ पुन र्यस्मा न्महर्द्धय स्तीर्थं करादिसंपदः ॥ उन्मीलंति विकसंति ॥ पुन र्यस्मात् कर्मणां ज्ञानावरणीयादीनां चयः समूहो ध्वंसं नाशं कलयति प्रयाति ॥ पुन र्यस्मा त्तपसः त्रिदीवं स्वर्गः च पुनः शिवं मोक्षः स्वाधीनं

कामः शाम्यति दाम्यतींद्रियगणः कल्याण मुत्सर्प्पति ॥
उन्मीलंति महर्द्धयः कलयति ध्वंसं च यः कर्मणां ॥
स्वाधीनं त्रिदिवं शिवं च भजति श्लाघ्यं तप स्त न्नः किं ८२
कांतारं न यथे तरो ज्वलयितुं दक्षो दवाग्निं विना ॥

स्यायत्तं स्या त्तत्त पः किं श्लाघ्यं न स्यात् ॥८२॥ अन्य श्च कांतार मिति ॥ यथा कांतारं वनं ज्वालयितुं ॥ दावाग्निं विना इतरो ऽन्यो दक्षोन पुन र्यया दावाग्निं ६१

शमयितुं विध्यापयितुं ॥ अंभोधरं मेघं विना ऽपरः शक्तो न समर्थो न ॥ पुन र्यथा ऽंभोधरं मेघं निरसितुं दूरिकर्तुं पवनं विना ऽन्यो न निष्नातो न निपुणः तथै व कर्मौघं कर्म समूहं हंतुं छेतुं तपसा विना ऽन्यत्किं समर्थं अपितु न किमपि

दावाग्निं न यथे तरः शमयितुं शक्तो विनां भोधरं ॥
निष्नातः पवनं विना निरसितुं नान्योयथांभोधरं ॥
कर्मौघं तपसा विना किम परं हर्तुं समर्थ स्तदा ८३
संतोष स्थूलमूलः प्रशमपरिकर स्निग्धस्कंधप्रपंचः ॥

किंतु तप एव कर्माणि हर्तुं समर्थः ८३ पुन राह संतोष इति अयं तपः एव पादपो वृक्ष शिवसुखफलदः स्यात् शिव सुखा न्येव फलानि ददाती ति मोक्षफलद

ता स्यात् किंभूत स्तपः पादपः संतोषो मूर्छा त्याग एव स्थुलं पुष्टं मूलं यस्य स पुनः किं ० प्रशमलक्ष्मी एव परिकरः परिवारो यस्य स पुनः किं ० स्कंधा आचारांगादि श्रुतस्कंधा स्तेषां बंधो रचना एव प्रपंचो विस्तारो यस्य स ० पुनः किं ० पंचनां अक्षाणां इंद्रियाणां समाहारः पंचाक्षी पंचाक्ष्याः रोध एव शाखा यस्य

पंचाक्षी रोधशाखः स्फुरदभयदलः शीलसंपत्प्रवालः ॥
श्रद्धांभः पूरसेका द्विपुलकुलबलैश्वर्यसौंदर्यभोगः

स ० पुनः किं ० स्फुरत् देदीप्यमानं ॥ अभयं अभयदान मेव दलवं यस्य स ० अथवा स्फुटानि प्रकटानि विनयरूपाणि दलानि पत्राणि यस्य स ० ॥ पुन किं भू ० शीलसंप देव ब्रह्मव्रत मेव प्रवाला नवपल्लवा यस्य स ० ॥ पुनः किं ० ६२

श्रद्धा रुचिः सै वां भः पानीयं तस्याः पुर स्तेन सेकः सिंचनं तस्मात् विपुलानि विस्तीर्णानि कुलबलैश्वर्यसौंदर्या एयेव भोगो यस्य स ० ॥ अथ वा विपुलकुलबलैश्वर्या एयेव विस्तारस्य भोगो स ० ॥ पुनः किं ० स्वर्गादिनां देवलोकग्रैवेयका

स्वर्गादिप्राप्तिपुष्पः शिवसुखफलदः स्या त्तपः पादपो यं ८४
तपप्रक्रमः ॥ ४ १८ ॥
नीरोगे तरुणीकटाक्षित मिव त्यागऽव्ययेन प्रभोः

नुत्तरविमानानां प्राप्तय एव पुण्याणि यस्य स ० ॥ ईदृश स्तप एव पादपो वृक्षः स शिवसुख मेव फलं ददाति ॥ ८४ ॥ अत्र वसुदेव हरिकेशवल ॥ सिंदूरप्रकरा ख्यस्य व्याख्यायां हर्षकीर्त्तिभिः सूरिभि विहितायां तु तपसः प्रक्रमो ऽजनि ॥ ४

१९ ॥ भावोपदेश माह निरोगे इति ० ॥ भावनां शुभभावं विना दानार्हदर्चा तपः स्वाध्यायाध्ययनादि सर्व्वं अनुष्टानं क्रियाकरणं निःफलं स्यात् दानं च अर्हद र्चा देवजिनपूजा च तप श्च स्वाध्याया श्च ते आदौ यस्य तत् दानजिनपूजा तपः सिद्धांतपठना ॥ दिकं भावं विना निःफलं ॥ ॥ किं मिव ॥ नीरोगे पुरुषे तरुणी

सेवाकष्ट मिवो परोपण मिवां भोजन्मना मश्मनि॥
विश्वग्वर्ष मिवो षराक्षिति तले दानार्ह दर्चा तपः

कटाक्षित मिव ॥ युवतीकटाक्षविक्षेपण मिव यथानीरोगे तरुणीकटाक्षा निःफलाः पुनः किं मिव ॥ त्यागव्ययेन प्रभो दानरहिते कृपणे स्वामिनि सेवा कष्ट इव ॥ ६३
अदातरि स्वामिनि सेवाकष्टं निःफलं ॥ पूनः किं मिव ॥ अश्मनि पाषाणे अंभो

जन्मनां कमलानां उपरोपणं वापनं इव ॥ यथा पाषाणोपरि कमलवापनं निःफलं ॥ पुनः किं मिव ॥ ऊषरक्षितितले ॥ उषरभूमौ विष्वग्वर्षं मिव ॥ यथो खरभूमौ पर्व्व ते मेघवर्षणं निःफलं ॥ तथा शुभभावनां विना सर्व्वाक्रिया निःफला ॥ ८९

स्वाध्यायाध्ययनादि निःफल मनुष्टानं विना भावनां ८५
सर्व्वं ज्ञीप्सति पुण्य मीप्सति दयां धित्सत्य घं मित्सति ॥
क्रोधं दित्सति दानशीलतपसां साफल्य मादित्सति ॥

पुन राह ॥ सर्व्वं मिव ० ॥ यदि जनो लोकः सर्व्वं वस्तु ज्ञीप्सति ज्ञातुं इछति ॥ पुन यदि जनः पुण्यं धर्म्मं ईप्सति वांछति ॥ पुनर्यदि जनोदयां कृपां धित्सति ॥ धर्तुं मिछति ॥ पुन यदि अघं पापं मित्सति मातुं इछंति मित्सति

पुन यदि क्रोधं दित्सति खंडितुं इछति पुन यदि दानशीलतपसां साफल्यं सफल त्वं आदित्साति गृहितु मिछति ॥ पुन यदि कल्याणोपचयं कुशलवृद्धिं चिकिर्ष ति ॥ कर्तुं मिछति ॥ यदि भवांभोधेः संसारसमुद्रस्य तटं पारं लिप्सते लब्धुं

कल्याणो पचयं चिकीर्षति भवांभोधस्तटं लीप्सते
मुक्तिस्त्रीं परिरिप्सते यदि जन स्त द्भावये द्भावनां ८६
विवेकवनसारिणीं प्रशमशर्म संजीवनीं ॥

मिछति पुन मुक्तिस्त्रीं सिद्धिरमणि परिरिप्सते आलिंगितुं इछति ॥ जन स्तदा भा वनां शुभभावं भावयेत् ॥ कुर्या दित्यर्थः ॥ ८६ ॥ पुन विशेष माह ॥ विवेकेति ० भो भव्याः भावनां शुभपरिणाम रूपां भजंत सेवध्वं ॥ परैः अन्यैः कष्टानुष्टानैः ६४

शुभभावनारहितैः किं न किंचिदित्य र्थः ॥ कथंभूतां भावनां ॥ विवेकः कृत्या कृत्य विचार एव वनं तत्र सारणिः कुल्याः तां ॥ पुनः प्रशमशर्मणः उपशम सुख स्य संजीवनीं जीवनकर्त्रीं ॥ पुनः किं ० भव एव संसार एव अर्णवः समुद्र स्तत्र

भवार्णवमहातरीं मदनदावमेघावलीं ॥
चलाक्षमृगवागुरां गुरुकषायशैलाशनीं ॥
विमुक्तिपथवेसरीं भजतभावनां किं परैः ॥ ८७ ॥

महातरी महानावां ॥ पुनः किं ० मदन एव दावो दावाग्नि स्तत्र मेघस्या वलीं श्रे णिं ॥ पुनः किं० चंचलानि चंचलानि यानि अक्षाणि इंद्रिया एये व मृगा हरि णा स्तेषु वागुरां मृगजाल पाशबंधनं ॥ किं पुनः कीं ० ॥ गुरुं गरिष्ठश्चतुः कषा

यरूप एव शैलं पर्वत: ॥ तत्र श्मशाने अत्र पुन: किं ० विमुक्ते: ॥ सिद्धे: पंथा स्तत्र वेसरी अश्वतरी तद्वद्वारवाहका तस्मा छुभभावना एव कुर्वंतु ॥ ८७ ॥ पुन राह ॥ धनमिति ० धनं प्रचुरं वित्तं धनं पात्रेभ्यो दत्तं ॥ पुन रखिलं सम

धनं दत्तं वित्तं जिनवचनमभ्यस्तम खिलं ॥
क्रिया कांडं चंडं रचित मवनौ सुप्त मसकृत् ॥
तप स्तीव्रं तप्तं चरणम पि चीर्णं चिरतरं ॥

स्तं जिनवचनं ॥ जिनागमरूपं ॥ अभ्यस्तं पठीतं ॥ पुन श्चंडं भीमं क्रियाकांडं लोचादिरचितं कृतं ॥ पुन रवनौ भूमौ असकृ द्वारं सुप्तं शयनं कृतं ॥ पुन ॥ स्तीव्रं दु:करं तप स्तप्तं तप: कृतं ॥ पुन श्चरणं चारित्रं चिरतरं बहुकालं ॥ चि ६५

र्णं सेवितं परं चे द्यदि चित्ते भावो न शुभभावना नास्ति तदा धान्यस्य तुष वप नवत् सर्वं पूर्वोक्तं विफलं स्यात् ॥ ८८ ॥ अत्र मरुदेवी ॥ भरत ॥ प्रसन्नचंद्र राजर्षीणांकथा: ॥ सिंदूरप्रकराख्यस्य व्याख्यायां हर्षकीर्त्तिभि: सूरिभि विहितायां

न चे च्चित्ते भावं स्तुषवपनवन् सर्व मफलं ८८

भावनाप्रक्रम:

यद शुभरज:पाथो दृप्तें द्रियद्विरदां कुशं ॥

तु भावना प्रक्रमो ऽजनि ॥ ४ ॥ १० अथवैराग्य माह भो मुने तद्वै राग्यं विमृश्य चिंतयित्वा अभय संसाररहितो भव त त्किं यत्वैराग्यं अशुभं पाप मेव रजो धूली स्तत्र पाथो जलं तदुपशामकत्वात् पुन दृप्तानि इंद्रिया एयेव द्विरदा गजा

स्तेषां अंकुश मिवां कुशं वश्यकरं पुनः किं ० कुशल मेव कुसुमानी तेषां उद्यानं पुष्यारामं पुन र्यत् वैराग्यं माद्यन् मदोन्मत्तो यः मनः कपि र्वानरस्तस्य शृंखला निगडो बंधनं पुन र्यत् विरतिरमणीलीलावेश्म देशविरति सर्व्वविरति रेव स्त्री त

कुशलकुसुमोद्यानं माद्यन्मनः कपिशृंखलं ॥
विरतिरमणीलीलावेश्म स्मरज्वरभेषजं ॥
शिवपथरथ स्तद्वै राग्यं विमृश्य भवा भयः ८९

स्याः क्रीडागृहं पुन र्यत् स्मर एव ज्वर स्तस्यौ षधं कामज्वरौषधं पुन र्यत् शिवप थरथः मोक्षमार्गे रथसमानः त द्वैराग्यं विमृश्य विचार्य अभयः संसारभयरहितो भ व ८९ पुन राह चंडानिलेति यथाचंडानिलस्फुरितं प्रचंडवायुस्फुर्जितं अब्दचयं

मेघघटां अंतं विनाशं नयते ॥ प्रापयति पुन र्यथा दावार्चि दावाग्नि वृक्षसमूहं अं तं प्रापयति ॥ पुन र्यथा अर्कबिंबं सूर्यबिंबं तिमिरमंडलं ॥ अंधकारसमूहं अंतं नयते पुन र्यथा वज्रं इंद्रायुधं महिध्रनिवहं पर्व्वतसमूहं अंतं विनाशं नयति प्राप

चंडानिल स्फुरित मब्दचयं दवार्चि ॥
र्वृक्षव्रजं तिमिरमंडल मर्कबिंबं ॥
वज्रं महीध्रनिवहं नयते य थांतं ॥
वैराग्य मेक मपि कर्म तथा समग्रं ॥ ९० ॥

यति तथै एकम पि वैराग्यं मेव समग्रंकर्मअंतंनयति ९०
पुन राह नमस्याम इति चे द्यादि अंत श्चित्ते विरागो वैराग्य मेव स्फुरति वर्त्तते

तदा देवानां नमस्या नमस्कारणं शिवदा मोक्षदायिनि स्यात् ॥ पुनः शुभगुरो श्चरणवरि वस्या चरणयोः सेवा तदा शिवदा स्यात् ॥ पुन. रत्यंतश्रमपदं ईदृशी तपस्या तप स्तदैव शिवदा स्यात् पुनः गुणवतां ज्ञानादिगुणयुक्तानां उपस्या सेवा

नमस्या देवानां चरणवरिवस्या शुभगुरो
स्तपस्या निःसीमक्रमपद मुपास्या गुणवतां
निषद्या रण्ये स्यात् करणदमविद्या च शिवदा

पि तदे व शिवदा स्यात् ॥ पुन ररण्ये वने निषिद्या स्थिति स्तदैव शिवदा स्यात् ॥ पुनः करणदमविद्या इंद्रियदमनविधि रपि तदै व शिवदा स्यात् यदि अंत मध्ये वैराग्यं भवति ॥ कथंभूतो विरागः क्रूरागः क्षपणनिपुणः क्रूरं घोरं य ६७

दा गो अपराध स्तस्य क्षपणे क्षपणकरणे निपुण श्चतुरः ॥ ९१ ॥ विरक्तगुणा नाह ॥ भोगानिति ० विरक्तो वैराग्ययुक्तः पुमान् मुक्तिं विलभते सिद्धिं प्राप्नोति ॥ किंकृत्वा ॥ भोगान् शब्दादीन् कृष्न श्चासौ भुजंगः सर्प्पतस्य भोगः शरीरं ॥ तद्वत्

विरागः क्रूरागः क्षपणनिपुणो तः स्फुरति चेत् ९१
भोगान् कृष्नभुजंगभोगविषमान् राज्यं रजः संन्निभं
बंधून् बंधनिबंधनानि विषयग्रामं विषान्नोपमं

विषमान् भीमान् विदित्वा ज्ञात्वा ॥ तेषु अत्यासक्तिं अत्यभिलाषं त्यजन् ॥ पुनः राज्यं आधिपत्यं रजः सन्निभं धूलिसदृशं मत्वा त्यजन् ॥ पुन बंधून् स्वजनान् कर्मबंधस्य निबंधनानि कारणनि मत्वा विषयग्रामं विषयसमूहं ॥ विषान्नोपमं ॥ विषमि

श्रिताग्निसमं मत्वा ॥ पुन र्भूतिं ऋद्धिं भूतिसहोदरां भस्मभगिनीं रक्षासदृशीं मत्वा पुनः स्त्रैणं स्त्रीणां समूहं तृण मिव तृण सदृशं विदित्वा तेषु आसक्तिं अत्यभिलाषं त्यजन् ॥ कथंभूतो विरक्तः पुमान् ॥ अनाविलः रागद्वेषाद्यनाकुलः ॥ ९२

भूतिं भूतिसहोदरां तृण मिव स्त्रैणं विदित्वा त्यज
न्नेष्वासक्ति मनाविलो विलभते मुक्तिं विरक्तः पुमान् ९२

वैराग्यप्रक्रमः ॥ ४ २१ ॥

जिनेंद्रपूजा गुरुपर्युपास्तिः सत्वानुकंपाशुभपात्रदानं

सिंदूरप्रकराख्यस्य व्याख्यायां हर्षकीर्त्तिभिः सूरिभिर्विहितायां तु वैरागप्रक्रमो ऽजनि ॥ ४ ॥ २१ अथ सामान्योपदेश माह ॥ अमूनि कानि ॥ प्रथमंतावज्जिनें

न लभ्य स्तस्मिन् ९६ करे इति अहो आश्चार्ये प्रतिमहतां स्वभावेनो त्तमानां पुंसां ऐश्वर्येण साम्राज्येन विना पि इदं मंडनं अस्ति इद मिति किं करे हस्ते त्यागो दानं श्लाघ्योमंडनकंकणादिः ॥ पुनः शिरसि गुरुणां पादयो श्चरणयोप्रणम

करे श्लाघ्य स्त्यागः शिरसि गुरुपादप्रणमनं
मुखे सत्या वाणी श्रुत मधिगतं च श्रवणयोः
हृदि स्वच्छा वृत्ति र्विजयि भुजयोः पौरुष महो ॥

नं नमस्कारकरणं मंडनं न कुकुटतिलकादीनी मुखे सत्यावाण्येव मंडनं ॥ न तांबूलादिः ॥ श्रवणयोः कर्णयोः अधिगतं पठितं श्रुतं शास्त्र मेव मंडनं न कुंडलादिः ॥ हृदि हृदये स्वच्छा निर्मला वृत्ति र्व्यापार एव मंडनं न हारमालादि ॥

श्रित्तं नयमार्गं न्यायमार्गं प्रति नय ॥ पुनः स्मरक्रोधाद्याः काम क्रोध मान माया लोभा द्यान् शत्रून् दलय खंडय ॥ पुनः प्राणीषु जीवेषु दयां कलय कुरु ॥ पुन जिनोक्तं अर्हत्प्रणीतं सिद्धांतं सूत्रं श्रृणु ॥ एतानि कृत्वा जवात् वेगात् मुक्ति

श्रियः पात्रे वापं जनय नयमार्गं नय मनः
स्मरक्रोधाद्यारीन् दलय कलय प्राणिषु दयां
जिनोक्तं सिद्धांतं श्रृणु वृणु जवा न्मुक्तिकमलां ९४
कृत्वा र्हत्पदपूजनं यतिजनं नत्वा विदित्वा गमं ॥

कमला शिवश्रियं वृणु वरय. ॥ ९४ ॥ कृत्वा र्हति ति ॥ भो श्राद्धाएतानि कृत्वा इष्टं वांछितसुखं करक्रोडस्थं हस्तोत्संगगतं कुरु करप्राप्यं कुरु ॥ किं कृत्वा अर्ह

त्पदपूजनं ॥ वीतरागचरणपूजां कृत्वा पुन यतिजनं साधुजनं नत्वा ॥ पुन रागमं सिद्धांतं विदित्वा ज्ञात्वा श्रुत्वा ॥ पुनः अधर्मकर्मठधियां पापासक्तबुद्धीनां संगं संसर्गं त्यक्त्वा परित्यज्य ॥ पुनः पात्रेषु निजधनं वित्तं दत्वा पुनः उत्तमक्रमजुषां उत्तम

हित्वा संग मधर्मकर्म ठधियां पात्रेषु दत्वा धनं ॥
गत्वा पद्धति मुत्तमक्रमजुषां जित्वां तरारिव्रजं ॥
स्मृत्वा पंचनमस्क्रियां कुरु करक्रोडस्थ मिष्टं सुखं ९५

मार्गसेविनां ॥ पद्धतिं मार्गं प्रति गत्वा अनुश्रित्य आंतरारिव्रजं ॥ आंतरागारिषड्वर्गं आभ्यंतरं ॥ वैरिसमूहं जित्वा पुनः पंच नमस्क्रियां ॥ नमस्कारमंत्रं स्मृत्वा ध्यात्वा इष्टं सुखं करप्राप्यं कुरु ॥ ९५ ॥ न्याय्ये न्यायोपपन्ने पथि मार्गे तथा प्र

वर्त्तनं कार्यं तथा प्रवृतिः कार्या ॥ यथा चतुर्षुदिक्षु क्षपाकरसोदरा चंद्रकिरणवदु ज्वला कीर्त्ति स्फुरति विस्तरति ॥ पुन र्यथा अभ्युदयजननी उदयकारका ॥ गुण संतति गुणश्रेणिः स्फातिं याति विस्तारं व्रजति ॥ पुन र्यथा कुकर्म हर्तौ पापहन

प्रसरति यथा कीर्त्तिर्दिक्षु क्षपाकरसोदरा ॥
भ्युदयजननी याति स्फातिं यथा गुणसंततिः ॥
कलयति यथा वृद्धिं धर्मः कुकर्महतिक्षमः ॥
कुशलसुलभे न्याये कार्यं तथा पथि वर्त्तनं ॥ ९६

ने क्षमः समर्थो धर्म्मो वृधिं कलयति ॥ वृद्धिं प्राप्नोति ॥ तथा न्याये पथि न्यायमार्गे प्रवर्त्तनं कार्यं ॥ कथंभूते न्याये पथि ॥ कुशलै श्चतुरपुरुषैः सुलभः सुप्रापः सुखे ७०

न लभ्य स्तस्मिन् ९६ करे इति अहो आश्चार्ये प्रतिमहतां स्वभावेनो त्तमानां पुंसां ऐश्वर्येण साम्राज्येन विना पि इदं मंडनं अस्ति इद मिति किं करे हस्ते त्यागो दानं श्लाघ्योमंडनकंकणादिः ॥ पुनः शिरसि गुरुणां पादयो श्चरणयोप्रणम

करे श्लाघ्य स्त्यागः शिरसि गुरुपादप्रणमनं
मुखे सत्या वाणी श्रुत मधिगतं च श्रवणयोः
हृदि स्वच्छा वृत्ति र्विजयि भुजयोः पौरुष महो ॥

नं नमस्कारकरणं मंडनं न कुकुटतिलकादीनी मुखे सत्यावाण्येव मंडनं ॥ न तां बूलादिः ॥ श्रवणयोः कर्णयोः अधिगतं पठितं श्रुतं शास्त्र मेव मंडनं न कुंड लादिः ॥ हृदि हृदये स्वच्छा निर्मला वृत्तिं र्व्यापार एव मंडनं न हारमालादि ॥

भुजयो र्बाधा विजाये ॥ जयनशीलं पौरुषं पराक्रमो धर्म विषये य द्रूलं त देव
मंडनं न केयुरादि महतां पुंसां धनं विना पी दमेव मंडनं ९७
भवारण्य मिति ० ॥ भो श्राद्ध यदि भवारण्यं संसाररूपा अटवी मुक्ता त्यक्ता य

विना प्पै श्वर्येण प्रकृति महतां मंडन मिदं ९७
भवारण्यं मुक्ता यदि जिगमिषु र्मुक्तिनगरीं ॥
तदानीं मा न्कार्षी विषयविषवृक्षेषु वसतिं ॥

दि मुक्ती नगरीं सिद्धि पुरीं प्रति जिगमिषु रसि गंतुकामो ऽसि ॥ तदानीं विष
या एव ॥ विषवृक्षा स्तेषां वसतिं निवासं मा कार्षं माकृव्यथाः ॥ कुतः ॥ यतो ७१
दस्मात् कारणात् एषां विषयवृक्षाणां छाया पि महामोहं मह ज्ञानं प्रथयति वि

... व्यरचितानि ॥ ... ॥ य सोमप्रभः अजित देवना
माचार्यस्य पद एव उदयाद्रि रुदयाचल स्तत्र द्युमणिः सूर्यसमानः विजयसिंहाचा
र्य स्तस्य पादारविंदे चरणकमले मधुकरसमतां भ्रमरतुल्यतां ॥ अभजत् प्रापत् ॥

द्युमणिर्विजयसिंहाचार्यपादारविंदे ॥
मधुकरसमतां यस्तेन सोमप्रभेण ॥
व्यरचि मुनिपराज्ञा सूक्तिमुक्तावलीयं १०० ॥

पूर्वंअजितदेवाचार्य ॥ स्त त्पदे विजयसिंहाचार्य स्तत्पदे सोमप्रभाचार्य स्तेने
यं सिंदूरप्रकरनामा सूक्तमूक्तावली व्यरचिता कृता ॥ १०० ॥ सिंदूरप्रकराख्यस्य
व्याख्यायां हर्षकीर्त्तिभिः सूरीभि र्विहितायां तु ॥ सामान्यप्रक्रमो ऽजनि ॥ १ ॥

तपोगणे नागपूरियपूर्व श्रीचंद्रकीर्त्याव्हयसूरीराजा ॥ तेषां शिष्यहर्षकीर्ति ॥
सूरीश्वरो वृत्ति मिमा मकार्षीत् ॥ १ ॥ इतिश्रीसिंदूरप्रकरस्यटीकासंपूर्णा ॥ श्री
रस्तु ॥ शुभंभवतु ॥ कल्याणमस्तु ॥

सूक्तिमुक्तावलीनाम शतकंचंद्रकीर्ति
निर्मितंटीकयाश्रीमत् हर्षकीर्त्याख्यया ॥
सिंदूराख्यप्रकर्णंच विद्याशालानुयायिभिः
मुद्रांकितंचभव्यानां कल्याणहितहेतवे ॥ २ ॥

इतिसमाप्तं.

स्तारयति ॥ अन्येषा मपि विषयवृक्षाणां छाया माहामोहं महति मूर्छां जनयति ॥
यस्मा न्महामोहा दयं जंतुः ॥ प्राणी अचिरा द्वेगात् पद मपि गंतुं एकं पादं म
पि चलितुं न शक्नोति ॥ किंतु स्थावरत्वं प्राप्नोति ॥ अथ समर्थयति ॥ सोमप्रभे

यत श्छाया प्ये षां प्रथयते महामोह मचिरा ॥
दयं जंतु र्यस्मा त्पद मपि न गंतुं प्रभवति ९८
सोमप्रभा चा र्यमभा न्ययन्नः ॥
पुंसा तमः पंक मपाकरोति ॥

ति ० ॥ सोमप्रभा चंद्रकांति श्च ॥ पुनः अर्यमभा सूर्यप्रभा अपि पुंसां य त्तमः ॥
पंकं अंधकारकर्दमं न अपाकरोति न दूरिकरोति ॥ तद पि तादृशम पि तमः

पंकं अज्ञानपापं ॥ अमुष्मिन् सिंदूरप्रकराख्ये उपदेशलेशे निशम्यमाने श्रूयमाणे स
ति अनिशं निरंतरं नाशं एति क्षयं याति एतत् श्रवणा त्त तमः पापं च याति

तद प्प मुष्मिन्नु पदेशलेशे ॥
निशम्यमाने निश तेति नाशं॥ ९९ ॥
अभज दजितदेवाचार्यपदो दयाद्रि ॥

अत्र सोमप्रभाचार्य इति ॥ ग्रंथकता स्वनामापि सूचितं ९९
अथ प्रशस्ति माह ॥ अभज दजितदेवेति ॥ तेन सोमप्रभेण मुनिपराज्ञा मुनिपाः
मुनिश्रेष्ठा स्तेषां राजा ॥ सरीश्वर स्तेन मुनिपराज्ञा सूरीश्वरेण इयं सूक्तमुक्तावली ७२
उक्ता न्येव सुभूषिता न्येव शोभनप्रस्तावकाव्या न्येव मुक्ता मौक्तिकानि मुक्ताफला